**Each directory should have a file called README bib.txt. with bibliographic entry with following details**:-

| | | | |
|---|---|---|---|
| **i.** | Discipline | : | **Sahitya** |
| | Name of the text | : | **Vasavadutta** |
| **ii.** | Author | : | **SUBANDHU** |

**File named "README_type_log.txt" containing the following details**:-

| | | | |
|---|---|---|---|
| **i.** | Name of the institute | : | **Jaipur Campus** |
| **ii.** | (a) Principal Investigator | : | **Prof. Radhavallabh Tripathi** |
| | (b) Investigator | : | **Prof. K.B. Subbarayudu** |
| | (c) Co-investigator | : | **Dr. Shukla Mukherjee** |
| | (d) Editor | : | **Prof. Keswan K.P.** |
| **iii.** | Name of the typist | : | **Sanjay Kumar Sharma** |
| **iv.** | Completion date of data entry | : | **29.07.2011** |
| **v.** | Name of the proof reader | : | **Prof. Keswan K.P.**<br>**Dr. Ramakant Pandey**<br>**Dr. Ramkumar Sharma**<br>**Dr. Umakant Chaturvedi** |
| **vi.** | Completion date of proof reading | : | **28.07.2011** |
| **vii.** | Name of the approval authority from Rashtriya Sanskrit Sansthan | : | **Prof. Arknath Choudhary** |
| **viii.** | Date of approval | : | **28.07.2011** |

महाकविसुबन्धुविरचिता

# वासवदत्ता

व्याख्याकारः

## पण्डित शङ्करदेवशास्त्री

प्रस्तावनालेखक

## पं. शिवदत्त शुक्ल

# वासवदत्ता

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ।।१।।

खिन्नोऽसि मुञ्च शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः।
भरभुग्नविततबाहुषु गोपेषु हसन् हरिर्जयति ।।२।।

कठिनतरदामवेष्टनलेखासन्देहदायिनो यस्य।
राजन्ति बलिविभङ्गा स पातु दामोदरो भवतः।।३।।

स जयति हिमकरलेखा चकास्ति यस्योमयोत्सुकान्निहिता ।
नयनप्रदीपकज्जलजिघृक्षया रजतशुक्तिरिव ।।४।।

भवति सुभगत्वमधिकं विस्तारितपरगुणस्य सुजनस्य ।
वहति विकासितकुमदो द्विगुणरुचिं हिमकरोद्योतः।।५।।

विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः।
यदयं नकुलद्वेषी सकुलद्वेषी पुनः पिशुनः ।।६।।

अतिमलिने कर्त्तव्ये भवति खलानामतीव निपुणा धीः।

तिमिरे हि कौशिकानां रूपं प्रतिपद्यते चक्षुः ।।७।।

विध्वस्तपरगुणानां भवति खलानामतीव मलिनत्वम् ।

अन्तरितशशिरुचामपि सलिलमुचां मलिनिमाऽभ्यधिकः ।।८।।

हस्त इव भूतिमलिनो यथा यथा  लङ्घयति खलः सुजनम् ।

दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ।।९।।

सा रसवत्ता विहता नवका विलसन्ति चरति नो  कङ्कः।

सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये ।।१०।।

अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।

अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला ।।११।।

गुणिनामपि निजरूपप्रतिपत्तिः परत एव सम्भवति ।

स्वमहिमदर्शनमक्ष्णोर्मुकुरतले जायते यस्मात् ।।१२।।

सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुः सुजनैकबन्धुः ।

प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धम् ।।१३।।

अभूदभूतपूर्वः सर्वोर्वीपतिचक्रचारुचूडामणिश्रेणीशाणकोणकषणनिर्मलीकृतचरण-नखमणिर्नृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः कृष्ण इव कृतवसुदेवतर्पणो नारायण इव सौकर्यसमासादितधरणिमण्डलः कंसारातिरिव जनितयशोदानन्दसमृद्धिरानकदुन्दुभिरिव कृतकाव्यादरः सागरशायीवानन्त-भोगिचूडामणिमरीचिरञ्जितपादपद्मो वरुण इवाशान्तरक्षणोऽगस्त्य इव दक्षिणाशाप्रसाधको जलनिधिरिव वाहिनीशतनायकः समकरप्रचारश्च हर इव महासेनानुगतो निवर्तितमारश्च मेरुरिव विबुधालयो विश्वकर्माश्रयश्च रविरिव क्षणदानप्रियश्छायासन्तापहरश्च कुसुमकेतुरिव जनितानिरुद्धसम्पद्रतिसुखप्रदश्च विद्याधरोऽपि सुमना धृतराष्ट्रोऽपि गुणप्रियः क्षमानुगतोऽपि सुधर्माश्रितो बृहन्नलानुभावोऽप्यन्तः सरलो महिमहिषीसम्भवोऽपि वृषोत्पादी, अतरलोऽपि महानायको राजा चिन्तामणिर्नाम । यत्र च शासति धरणिमण्डलं छलनिग्रहप्रयोगो वादेषु नास्तिकता चार्वाकेषु कण्टकयोगो नियोगेषु परीवादो वीणासु खलसंयोगः शालिषु द्विजिह्वसङ्गृहीतिराहितुण्डिकेषु करच्छेदः क्लृप्तकरग्रहणेषु नेत्रोत्पाटनं मुनीनां द्विजराजविरुद्धता पङ्कजानां सार्वभौमयोगो दिग्गजस्याग्नितुलाशुद्धिः सुवर्णानां सूचीभेदो मणीनां शूलभङ्गो युवतिप्रसवे दुःशासनदर्शनं भारते करपत्रदारणं जलजानाम्। महावराहो गोत्रोद्धरणप्रवृत्तोऽपि

गोत्रोद्दलनमकरोत्। राघवः परिहरन्नपि जनकभुवं जनकभुवा सह वनं विवेश । भरतो रामे दर्शितभक्तिरपि राज्ये विराममकरोत्। नलस्य दमयन्त्या मिलितस्यापि पुनर्भूपरिग्रहो जातः। पृथुरपि गोत्रसमुत्सारणविस्तारितभूमण्डलः। इत्थं नास्ति वागवसरः पूर्वतरराजसु। स पुनरन्य एव देवो न्यक्कृतसर्वोर्वीपतिचरितः। तथाहि स पर्वतः कटकसञ्चारिणो गन्धर्वान् दर्शितशृङ्गोन्नतिः सुखयन् न विरराम। स हि मालयो नावश्यायोच्छलितो नो मायाजन्मने हितश्च। स हि मानी गिरिस्थितो वृषध्वजः। असौ सदागतिरवधूताखिलकान्तारः पावकाग्रेसरी नभोगोत्सुकः सुमनोहरश्च। स रत्नाकरोऽनहिमयः कथमगाधः समर्यादो नोद्रोकोऽप्यस्य विस्मयः सदा हिमकराश्रयोऽमृतमयः सपोतस्तस्याचलो नक्रोधो महानदीनः समुद्रः। स चन्द्र इव क्षणदानन्दकरः कुमुदवनबन्धुः सकलकलाकुलगृहं नतारातिबलः। मित्रोदयहेतुः काञ्चनशोभां बिभ्रदचलाधिकलक्ष्मीः सुमेरुरिव।

यस्य च रिपुवर्गः सदा पार्थोऽपि न महाभारतरणयोग्यः, भीष्मोऽप्यशान्तनवेहितः, सानुचरोऽपि न गोत्रभूषितः। अपि च त्रिशङ्कुरिव नक्षत्रपक्षस्खलितः, शङ्करोऽपि न विषादी, पावकोऽपि न कृष्णवर्त्मा, आश्रयाशोऽपि दहनः, नान्तक इवाकस्मादपहृतजीवनः न राहुरिव मित्रमण्डलग्रहणविवर्द्धितरुचिः, न नल इव कलिविघटितः, न चक्रीव

शृगालवधस्तुतिसमुल्लसितः, नन्दगोप इव यशोदयाऽऽश्रितः, जरासन्ध इव घटितसन्धिविग्रहः, भार्गव इव सदानभोगः, दशरथ इव सुमित्रोपेतः सुमन्त्राधिष्टितश्च, दिलीप इव सुदक्षिणानुरक्तो रक्षितगुश्च, राम इव जनितकुशलवयोरूपोच्छ्रायः।

तस्य च पारिजात इवाश्रितनन्दनः, हिमालय इव जनितशिवः, मन्दर इव भोगिभोगाङ्कितः, कैलास इव महेश्वरोपभुक्तकोटिः, मधुरिव नानारामानन्दकरः, क्षीरोदमथनोद्यतमन्दर इव मुखरितभुवनः रागरज्जुरिवोल्लासितरतिः, ईशानभूतिसञ्चय इव सन्ध्योच्छलितः, शरन्मेघ इवावदातहृदयो विष्णुपदावलम्बी च, पार्थ इव समरसाहसोचितः, कंस इव कुवलयापीडभूषितः, तार्क्ष्य इव विनताऽऽनन्दकरः, सुमुखनन्दनश्च, विष्णुरिव क्रोडीकृतसुतनुः, शान्तनव इव स्ववशस्थापितकालधर्मः, कौरवव्यूह इव सुशर्माधिष्ठितः, जलधरसमय इव विमलतरवारिधारात्रासितराजमण्डलः, सुबाहुरपि रामानन्दी, समदृष्टिरपि महेश्वरः, मुक्तामयोऽप्यतरलमध्यः, वंशप्रदीपोऽप्यक्षतदशस्तनयोऽभूत्कन्दर्पकेतुर्नाम।

येन च चन्द्रेणेव सकलकलाकुलगृहेण, शर्वरीतिहारिणा, दलितकैरवेण, प्रसाधिताशेन विलोकिताः, जलधय इव समुल्लसितगोत्राः, सुदूरविवर्द्धितजीवनाः, प्रसन्नसत्त्वाः सन्तः, परामृद्धिमवापुः।

यस्य च जनितानिरुद्धलीलस्य, रतिप्रियस्य, कुसुमशरासनस्य मकरकेतोरिव दर्शनेन, वनिताजनस्य हृदयमुल्ललास।

यस्मै चानुगतदक्षिणसदागतये, नेत्रश्रुतिसुखदाय, कोमलकोकिलरुताय, विकासितपल्लवाय, कृतकान्तारतरङ्गाय सुरभिसुमनोऽभिरामाय, सर्वजनसुलभपद्माय, विस्तृतकनकसम्पदे अतिक्रान्तदमनकाय वसन्तायेव उपवनलता इवोत्कलिकासहस्रसङ्कुलाः भ्रमरसङ्गताः, प्रबालहारिण्यः विलसद्वयसस्तरुण्यः स्पृहयाञ्चक्रुः।

यस्य च समरभुवि भुजदण्डेन कोदण्डं, कोदण्डेन शराः, शरैररिशिरः, अरिशिरसा भूमण्डलं, भूमण्डलेनानुभूतपूर्वो नायकः, नायकेन कीर्त्तिः, कीर्त्या च सप्तसागराः, सागरैः, कृतयुगादिराजचरितस्मरणम् स्मरणेन स्थैर्यम्, स्थैर्येण प्रतिक्षणमाश्चर्यमासादितम्।

यस्य च प्रतापानलदग्धदयितानां रिपुसुन्दरीणां करतलताडनभीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः।

यस्य च निशितनाराचजर्जरितमत्तमातङ्गकुम्भस्थलविगलितनिस्तलमुक्ताफल-निकरदन्तुरितपरिसरे, पतत्पत्ररथे, रक्तवारिसमुड्डयमानद्विरदपदकच्छपे विलसदुत्पलपुण्डरीके, वाहिनीशतसमाकुले, नृत्यत्कबन्धविधुरे, सुरसुन्दरीसमाग-

मोत्सुकभटाहङ्कारभाषणरवभीषणे, सागर इव समरशिरसि, भिन्नपदातिकरि-तुरगरुधिरार्द्रजयलक्ष्मीपादालक्तकरागरञ्जित इव खङ्गो रराज।

अथ स कदाचिदवसन्नायां यामवत्यां दधिधवलकालक्षपणकग्रासपिण्ड इव, निशायमुनाफेनपुञ्ज इव मेनकानखमार्जनधवलशिलाशकल इव, मधुच्छत्रच्छायमण्डलोदरे, पश्चिमाचलोपधानसुखनिषण्णशिरसो राजतताटङ्कचक्र इव, श्यामश्यामायाः, शेषमधुभाजि चषक इव विभावरीवध्वाः, अपरजलधिपयसि शङ्खकान्तिकामुक इव मज्जति कुमुदिनीनायके, शिशिरहिमशीकरकर्दमितकुमुदमध्यबद्धचरणेषु षट्चरणेषु, कलप्रलापप्रागबोधितचकिताभिसारिकासु, सारिकासु, प्रबुद्धाध्ययनकर्मठेषु मठेषु, विभासरागमुखरकार्पटिकजनोपगीयमानकाव्यकथासु रथ्यासु, सकलनिपीतनैशतिमिर-संघातमतनीयस्तया वोढुमसमर्थेष्विव, कज्जलव्याजादुद्वमत्सु, कामिमिथुननिधुवनलीला-दर्शनार्थमिवोद्ग्रीविकाशतदानखिन्नेषु, विविधविभ्रमसुरतक्रीडासाक्षिषु, शरणागत-मिवाधोनिलीनं तिमिरमवत्सु, दुर्जनवचनेष्विव दग्धस्नेहतया मन्दिमानमुपगतेषु, अतिवृद्धेष्विव दशान्तमुपगतेषु, विपन्नसदीश्वरेष्विव पात्रमात्रावशेषेषु, दानवेष्विव निशाऽन्तमध्यचारिषु, अस्तगिरिशिखरेष्विव पततत्पतङ्गेषु प्रदीपेषु, अनवरतनिपतन्मकरन्दबिन्दुसन्दोहास्वाद-मदमुग्धमधुकरनिकुरम्बझङ्कारमुखरितेषु,

म्लानिमानमुपगच्छत्सु वासागार-कुसुमोपहारेषु, विगलत्कुन्दैरलकैः प्रियविरहशोकाद्बाष्पबिन्दूनिवोत्सृजतीषु, प्रियतमगमननिषेधमिव कुर्वतीषु वाचालतुलाकोटिभिश्चरणपल्लवैः, रजनिशेषसुरतभरपरिश्रमविगलितकेशपाश-दरदलितमाधवीमालापरिमललुब्धमधुकरनिकुरम्ब-पक्षानिलनिपीतनिदाघजलकणिकासु, उद्वेल्लद्भुजवल्लिकङ्कणझणत्कारसुभगासु, नखपदसंसक्तकेशपाशविनिर्मोकवेदनाकृत-सीत्कारविनिर्गतदुग्धमुग्धदशनकिरणच्छटाधवलितभोगावासासु, पुनर्दर्शनप्रश्नविधुरसखी-जनानुक्षणवीक्ष्यमाणप्रियतमासु, क्षणदागत-सुरतवैयात्यवचनसंस्मारकगृहशुक-चाटुव्याहृतिक्षणजनितमन्दाक्षासु, शरद्वासरलक्ष्मीष्विव नखालङ्कृतपयोधरासु, आसन्नमरणास्विव जीवितेशपुराभिमुखीषु वसन्तराजिष्विव उत्कलिकाबहुलासु, प्रियैरालिङ्गयमानासु कामिनीषु, आन्दोलितकुसुमकेसरे केसरेणुमुषि रणितनूपुरमणीनां रमणीनाम्, विकचकुमुदाकरे मुदाकरे सङ्गभाजि, प्रियविरहितासु रहितासु सुखेन मुर्मुरचूर्णमिव समन्तादर्पके दर्पकेषु दहनस्य, दूरप्रसारितकोकप्रियतमारुते मारुते जघनमदननगरतारणस्रजा, मन्मथमहानिधिजघनकोशमन्दिरकनकप्राकारेण, रोमराजिल-तालवालवलयेन, जघनचन्द्रमण्डलपरिवेषेण, मदनत्रिभुवनविजयप्रशस्तिवर्णावलोकन-कपत्रेण, सकलहृदयबन्दीजननिवास-गृहपरिखावलयेन, सकलजगल्लोचनलासकविहङ्ग-

मावासकनकशलाकागुणेन, मेखलादाम्ना परिकलितजघनस्थलाम्' उन्नतपयोधरभारान्तरितमुखचन्द्रदर्शनाप्राप्तिखेदेनेव, गुरुतरनितम्बबिम्बकुचकुम्भ-निरुद्धोभयपार्श्वजनितायासेनेव, मम मूर्ध्नि स्थितयोरियत्प्रमाणयोः पयोधरकलशयोः कथं मय्येव पातो भविष्यतीति चिन्तयेव, गृहीतगुरुकलत्रानुशयेनेव, विधातुरतिपीडयतो हस्तपरामर्शजनितपरिक्लेशेनेव, क्षीणतामुपगतेन मध्यभागेन अलङ्कृताम्। अनुरागरत्न-पूरितकनकमयपरुवकाभ्याम्, चूचुकमुद्रासनाथाभ्याम्, अतिगुरुपरिणाहतया पतनभयात् चूचुकच्छलेन विधिना गिरिसारेणेव कीलिताभ्याम्, सकलावयवनिर्मितिशेषलावण्यपुञ्जाभ्यामिव, हृदयतटाककमलमुकुलाभ्यामिव, हृच्छयविलासचातुरकविभ्रमाभ्याम्, रोमावलीलताफलभूताभ्याम्, कन्दर्पदर्पवर्धन-चूर्णपूर्णकनककलशाभ्यामिव, अशेषजनहृदयपतनादिव सञ्जातगौरवाभ्याम्, संसारतरुमहाफलाभ्याम्, हारलतामृणाललोभनीयचक्रवाकाभ्याम् हारलतारोमरा-जिव्याजगङ्गायमुनासङ्गमप्रयागतटाभ्याम्, त्रिभुवनविजयपरिश्रमखिन्नस्य, मकरकेतोर्विश्रमविजनावासगृहाभ्याम्, पयोधराभ्यां समुद्भासमानाम्। मुखचन्द्र-मण्डलसततसन्निहितसन्ध्यारागेण, द्विजमणिरक्षासिन्दूरमुद्रानुकारिणा, निस्सरता हृदयानुरागेणेव रञ्जितेन, रागसागरविद्रुमशकलेनेव अधरपल्लवेनोपशोभमानाम्।

तरुणकेतकदलद्राघीयसा, पक्ष्मलचटुलालसेन, हृदयावासगृहावस्थितस्य हृच्छयविलासिनो गवाक्षशङ्कामुपजनयता, सरागेणापि निर्वाणं जनयता, गतिप्रसरनिरोधकश्रवणकृतकोपेनेवोपान्तलोहितेन, धवलयतेव जगदखिलम्, उत्फुल्लकमलकाननसनाथमिव गगनतलं कुर्वता, दुग्धाम्भोधिसहस्राणीवोद्वमता, सकुन्दकुसुमनीलोत्पलमालालक्ष्मीमुपहसता नयनयुगलेन विभूषिताम्। दशनरत्नतुलादण्डेनेव, नयनामृतसिन्धुसेतुबन्धेनेव, यौवनमन्मथमत्तवारणयोर्वरण्डकेनेव नासावंशेन परिष्कृताम्। विलोचनकुवलयभ्रमरपङ्क्तिभ्याम् मुखमदनमन्दिरतोरणमालिकाभ्याम्, रागसागरवेणिकाभ्याम्, यौवननर्तकलासिकाभ्याम्, भ्रुलताभ्यां विराजिताम्। घनसमयाकाशलक्ष्मीमिव उल्लसच्चारुपयोधराम्, जयघोषणापन्नजनमूर्तिमिव तुलाकोटिप्रतिष्ठिताम्, सुयोधनधृतिमिव कर्णविश्रान्तलोचनाम्, वामनलीलामिव दर्शितवलिविभङ्गाम्, वृश्चिकराशिरविस्थितिमिव अतिक्रान्तकन्यातुलाम्, उषामिव अनिरुद्धदर्शनसुखाम् शचीमिव नन्दनेक्षणरुचिम्, पशुपतिताण्डवलीलामिव उल्लसच्चक्षुःश्रवसम्, विन्ध्याटवीमिव उत्तुङ्गश्यामलकुचाम्, वानरसेनामिव सुग्रीवाङ्गदशोभिताम्, भास्वताऽलङ्कारेण, श्वेतरोचिषा स्मितेन, लोहितेनाधरेण सौम्येन दर्शनेन गुरुणा नितम्बबिम्बेन, सितेन हारेण, शनैश्चरेण पादेन, तमसा केशपाशेन,

विकचेन लोचनोत्पलेन, ग्रहमयीमिव; संसारभित्तिचित्रलेखामिव त्रैलोक्यचित्तरङ्गस्य, रसायनसमृद्धिमिव यौवनमहायोगिनः, सङ्कल्पसिद्धिमिव शृङ्गारस्य, निधानमिव कौतुकस्य, विजयपताकामिव मकरध्वजस्य, आजिभूमिमिव मदनस्य, सङ्केतभूतिमिव लावण्यस्य, विहारस्थलीमिव सौन्दर्यस्य, एकायतनशालामिव सौभाग्यस्य उत्पत्तिस्थानमिव कान्तेः, स्तम्भनचूर्णमिव इन्द्रियाणाम् आकर्षणमन्त्रसिद्धिमिव मनसः, चक्षुर्बन्धनमहौषधिमिव मन्मथेन्द्रजालिनः त्रिभुवनविलोभनसृष्टिमिव प्रजापतेः, अष्टादशवर्षदेशीयां कन्यामपश्यत्स्वप्ने ।

अथ तां प्रीतिविस्फारितेन चक्षुषा पिबन्निव जनितेर्ष्ययेव निद्रया चिरसेवितया स मुमुचे। अथ प्रबुद्धस्तु विषसरसीव दुर्जनवचसीव निमग्नमात्मानमवधारयितुं न शशाक। तथा हि निर्लक्षमाकाशतले आलिङ्गनार्थं प्रसारितबाहुयुगलः, 'एह्येहि प्रियतमे ! मा गच्छ, मा गच्छे'ति दिक्षु विदिक्षु च विलिखितामिव, उत्कीर्णामिव चक्षुषि, निखातामिव हृदये प्रियतमाममाजुहाव। ततस्तत्रैव शय्यातले निलीनो निषिद्धाशेषपरिजनो दत्तकपाटः परिहृतताम्बूलादिसकलोपभोगस्तं दिवसमनयत्। तथैव निशामपि स्वप्नसमागमेच्छया कथमप्यनैषीत्। अथ तस्य प्रियसखो मकरन्दो नाम कथमपि लब्धप्रवेशदर्शनः कन्दर्पसायकप्रहारपरवशं कन्दर्पकेतुमुवाच--

सखे ! किमिदमसाम्प्रतमसाधुजनोचितमध्वानमाश्रितोऽसि। तवैतच्चरितमालोक्य वितर्कदोलासु निवसन्ति सन्तः। खलाः, पुनस्त्वदनुचितमनिष्टमाचरन्ति। अनिष्टोद्भावनरसोत्तरं हि भवति खलहृदयम्। को नामाऽस्य तत्त्वनिरूपणे समर्थः। तथाहि भीमो न बकद्वेषी, आश्रयाशोऽपि मातरिश्वा, अतिकटुरपि महारसः, सर्षपस्नेह इव करयुगलालितोऽपि शिरसा धृतोऽपि न कटुत्वं जहाति। तालफलरस इवापातमधुरः परिणामविरसस्तिक्तश्च। पादपराग इवावधूतोऽपि मूर्धानं कषाययति। विषतरुप्रसूनमिव यथा यथाऽनूभूयते, तथा तथा मोहमेव द्रढयति। नीचदेशस्येव नवारिविरहोऽस्य जायते। निदाघदिवस इव बहुमत्सरस्सुमनसां सन्तापं वहति। अन्धकार इव दोषानुबन्धचतुरः विश्वकर्मावलोपनोद्यतश्च। रुद्र इव विरूपाक्षः विष्णुरिव चक्रधरः। शक्राश्च इवोच्चैःश्रवाः नदेशजप्रशंसी च। शरस्येव विभिन्नस्यापि सतः स्नेहं दर्शयतः तक्राट इव हृदयं विलोडयति। यक्षबलिरिव आत्मघोषमुखरो मण्डलभ्रमणकश्च। मातङ्ग इव स्ववशालोलमुखोऽधरीकृतदानश्च, वृषभ इव सुरभियानविकलः, कामीव गोत्रस्खलनविधरो वामाध्वानुरक्तश्च। जीर्णरोग इव कलेवरे वचसि मन्दिमानमावहति। वञ्चक इव रक्तः कटपले, विभावरीरक्तश्च। परेत इव बन्धुतापदर्शनः। परशुरिव भद्रश्रियमपि खण्डयति। कुदाल इव दलितगोत्रः क्षमाभाजः प्राणिनश्च निकृन्तति। रतिकील इव जघन्यकर्मलग्नो

ह्रेपयति साधून्। दुष्टशूर्पश्रुतिरिव काननरुचिरनुगतमपि यवसं सततं नानुमोदते। अबीजादेव जायन्ते, अकाण्डादेव प्ररोहन्ति खलव्यसनाङ्कुराः। दुरुच्छेदाश्च न भवन्ति। असतां हृदि प्रविष्टो दोषलवः करालायते। सतां तु हृदि न प्रविशत्येव। यदि कथमपि प्रविशति तदा पारद इव क्षणमपि न तिष्ठति। मृगा इव विनोदविन्दोर्वशगा न भवन्ति साधवः। सुखं जना हि भावदृशाः शरत्समया इव हरन्ति मित्रमण्डलस्य। न च सचेतना विसदृशमुपदिशन्ति। अचेतनानामपि मैत्री समुचितपक्षे निक्षिप्ता। तथाहि माधुर्यशैत्यशुचित्वसन्तापशान्तिभिः पय इति शब्दसाम्याच्च मित्रतामुपगतस्य तत्सङ्गमादभिवर्धितस्य क्षीरस्य क्वाथे पुरतो ममैव क्षयो युक्त इति विचिन्त्येव वारिणा क्षीयते। तदिदमसाम्प्रतमाचरितम्। सखे! गृहाण साधुजनोचितमध्वानम्। साधवो हि दिङ्मोहादुत्पथप्रवृत्ता अपि पुनर्गृहीतसत्पथा भवन्ति।' इत्यादि वदति तस्मिन्मकरन्दे प्रियसखे, कथमपि स्मरशरप्रहारपरवशः कन्दर्पकेतुः परिमिताक्षरमुवाच-

वयस्य! दितिरिव शतमन्युसमाकुला भवत्यस्मादृशजनचित्तवृत्तिः। नायमुपदेशकालः। पच्यन्त इव मेऽङ्गानि। कृष्यन्त इवेन्द्रियाणि। भिद्यन्त इव मर्माणि। निस्सरन्तीव प्राणाः। उन्मूल्यन्त इव विवेकाः। नष्टेव स्मृतिः। अधुना तदलमनया

कथया। यदि त्वं सहपांसुक्रीडासमदुःखसुखोऽसि तन्मया सममागम्यतामित्युक्त्वा परिजनालक्षित एव तेन सह पुरान्निर्जगाम।

ततोऽनेकनल्वशतमध्वानं गत्वा तेनागस्त्यवचनसंहृतब्रह्माण्डखण्डगतशिखरसहस्रः, कन्दरान्तराललतागृहसुप्तप्रबुद्धविद्याधरमिथुनगीताकर्णनसुखितचमरीगणमारणोत्सुकशबर-कुलसम्बाधकच्छतटः, कटकतटगतकरिकराकृष्टभग्नहरिचन्दनस्यन्दमानरसामोदहरगन्ध-वाहशिशिरितशिलातलः, सुदूरपतनभग्नतालफलरसार्द्रकरतलास्वादनोत्सुकशाखा-मृगकदम्बकः, प्रलम्बमाननिर्झरोपान्तोपविष्टजीवंजीवकमिथुनलेलिह्यमानविविधफल-रसामोदसुरभितपरिसरः सरभसकेसरिसहस्रखरनखरधाराविदारितमत्तमातङ्कुम्भ-स्थलविगलितस्थूलमुक्ताफलशबलशिखरतया शिखरावलग्नं तारागणमिवोद्वहन्, सुग्रीव इव ऋक्षगवयशरभकेसरिकुमुदपनससेव्यमानपादच्छायः, पशुपतिरिव नागनिश्वास-समुत्क्षिप्तभूतिः, जनार्दन इव विचित्रवनमालः, सहस्रकिरण इव सप्तपत्रस्यन्दनोपेतः, विरूपाक्ष इव सन्निहितगुहः शिवानुगतश्च, कामीव कान्तारोषरसानुगतः समदनश्च, श्रीपर्वत इव सन्निहितमल्लिकार्जुनः, नरवाहनदत्त इव प्रियङ्गुश्यामासनाथः, शिशुरिव कृतधात्रीधृतिः, वासरारम्भ इवाप्रभापाटलितपत्रवनराजिः, कृष्णपक्ष इव बहुलतागहनः, कर्ण इवानुभूतशतकोटिदानः भीष्म इव शिखण्डिमुक्तैर्धचन्द्रैराचिततनुः, कामसूत्रविन्यास

इव मल्लनागघटितकान्तारसामोदः, हिरण्यकशिपुरिव शम्बरकुलाश्रयः, गैरिकव्याजादुपरिरविरथमार्गमार्गणार्थमिवारुणेनोपास्यमानः, शिखरगतसूर्याचन्द्रमस्तया विस्तारितलोचनोऽगस्त्यमार्गमुद्वीक्षमाणः, कुलिशक्षतरन्ध्रस्रस्तान्त्रजाल इव जरदजगरभोगैः, कुम्भकर्ण इव दन्तान्तरालगतैर्वानरव्यूहैः, पिण्डालक्तकरागपल्लवित-पदपङ्क्तिसूचितसञ्चार-शचीपतिपुरवारविलासिनी-सङ्केतकेतकीमण्डपः, अकुलीनोऽपि सद्वंशभूषितः, दर्शिताभयोऽपि मृत्युफलदायी, सप्रस्थोऽप्यपरिमाणः, सनदोऽपि निश्शब्दः, भीमोऽपि कीचकसुहृत्, पिहिताम्बरोऽपि विलसदंशुकः, विन्ध्यो नाम गिरिरदृश्यत।

यश्च प्रवृद्धगुल्मतया रोगीव दृश्यमानबहुधातुविकारः, साधुरिव सानुग्रहचारकप्रकटितमहिमा, मीमांसान्याय इव पिहितदिगम्बरदर्शनः, यश्च हरिवंशैरिव पुष्कराक्षप्रादुर्भावरमणीयैः, राशिभिरिव मीनमकरकुलीरमिथुनसङ्गतैः, करणैरिव शकुनिनागभद्रबालकुलोपेतैः, देवखातैरुपशोभितान्तः। यश्च छन्दोविचितिरिव कुसुमविचित्राभिर्वंशपत्रपतिताभिः, पुष्पिताग्राभिः प्रहर्षिणीभिः, शिखरिणीभिर्लताभिर्दर्शितानेकवृत्तविलासः। यश्च समदकलहंससारसरसितोद्भ्रान्त-भाकूटविकटकुञ्जकूर्चव्याधूतकमलषण्डगलितमकरन्दबिन्दुसन्दोहसुरभितसलिलया, सायन्तनसमयमज्जत्पुलिन्दराजसुन्दरीनिम्ननाभिमण्डलपीत-प्रतिहतरयसलिलया,

मदमुखराजहंसकुलकोलाहलमुखरितकूलपुलिनया, तटनिकटस्थितमत्तमातङ्गगण्डस्थल-विगलन्मदधाराबिन्दुप्रकरस्तबकितसलिलया, तीरप्ररूढकेतकीकाननपतितधूलीनिकुरम्ब-सञ्जातसितसैकतसुखोपविष्टतरुणसुरमिथुननिधुवनलीलापरिमलसाक्षिकूलो पवनया, तटावटविघटिताम्भोजषण्डमण्डपावस्थितजलदेवतावगाह्यमानपयसा, तीरप्ररूढवेत-सलताभ्यन्तरलीनदात्यूहव्यूहमदकलकुहकेलीकुहकुहारावकौतुकाकृष्टसुरमिथुनसंस्तूय-मानकूलोपवनोपभोगया, उपकूलसञ्जातनलनिपुञ्जितकुलायकुक्कुटघटाघटितघूत्कार-भैरवतीरया आतपसेवासमुत्सुकजलमानुषीमृदितसुकुमारतरपुलिनया, उपवनपवनान्दोलित-तरलतरतङ्गया, नलिनीनिकुञ्जपुञ्जनिविष्टदुष्टबकोटककुटुम्बिनीनिरीक्ष्यमाणवृद्धशफरया पोताधानलुब्धकोयष्टिकस्तम्भनभीमवेतसवनलतया, तरङ्गमालासन्तरदुद्दण्डबाल-दर्शनधावदतिचपलराजिलराजिराजितोपकूलसलिलया, खञ्जरीटमिथुननिधुवनदर्शनोपजात-निधिग्रहणकौतुककिरातशतखन्यमानस्थपुटिततीरया, क्रुद्धयेव दर्शितमुखभङ्गया, मत्तयेव स्खलद्गत्या, दिनारम्भलक्ष्म्येव वर्धमानवेलया, भारतसमरभूम्येव नृत्यत्कबन्धया, प्रावृषेव विजृम्भमाणशतपत्रपिहितविषधरया, धनकामयेव कृतभूभृत्सेवया, रेवया प्रियतमयेव प्रसारिततरङ्गहस्तयोपगूढः। यश्च -

हरिखरनखरविदारितकुम्भस्थलविकलवारणध्वानैः।

अद्यापि कुम्भसम्भवमाह्वयतीवोच्चतालभुजः ।।

तत्रान्तरे मकरन्दस्तमुवाच-

**पश्योदञ्चदवाञ्चदञ्चित वपुःपूर्वार्धपश्चार्धभाक्,**

**स्तब्धोत्तानितपृष्ठनिष्ठितमनाग्भुग्नाग्रलाङ्गूलभृत्।**

**दंष्ट्राकोटिविशङ्कटास्यकुहरः कुर्वन् सटामुत्कटा-**

**मुत्कर्णः कुरुते क्रमं करिपतौ क्रूराकृतिः केसरी।।**

अपि च -

**उत्कण्ठोऽयमकाण्डचण्डिमपटुः स्फारस्फुरत्केसरः,**
**क्रूराकारकरालवक्त्रकुहरः स्तब्धोर्ध्वलाङ्गूलभृत्,**

**चित्रे चापि न शक्यतेऽभि (वि) लिखितुं सर्वाङ्गसङ्कोचभाक्,**
**फीट्कुर्वद्गिरिकुञ्जकुञ्जरबृहत्कुम्भस्थलस्थो हरिः।।**

अनन्तरं नीचदेशनद्येव न्यग्रोधोपचितया, उत्तरगोग्रहणसमरभूम्येव विजृम्भमाणबृहन्नलया, कुरुदेशढक्कयेव घनसारसार्थवाहिन्या, विदग्धमधुगोष्ठ्येव नानाविटपीतासवया, नलकूबरचित्तवृत्त्येव सततधृतरम्भया, मत्तमातङ्गगत्येव घण्टारवावेदितमार्गया, सदीश्वरसेवयेव अदूरोद्गतबहुफलया, विराटलक्ष्म्येव

आनन्दितकीचकशतया, विन्ध्याटव्या कतिपयपदमध्वानं गत्वा कामिन इव मदनशलाकाङ्कितस्य, विकर्तनस्येव स्निग्धच्छायस्य, वैकुण्ठस्येव लक्ष्मीभृतः, यात्रोद्यतनृपतेरिव घनपत्रशोभितस्य, वेदस्येव भूरिशाखालङ्कृतस्य गाणिक्यस्येव अनेकपल्लवोज्ज्वलस्य, जम्बूतरोरधश्छायायां विशश्राम। अत्रान्तरे भगवानपि मरीचिमाली आतपक्लान्तवनमहिषलोचनपाटलमण्डलश्चरमाचलमारुरोह। ततो मकरन्दः फलमूलान्यादाय कथं कथमपि तमभिनन्दिताहारमकार्षीत्। स्वयमपि तदुपभुक्तशेषमकरोदशनम्। अथ तामेव प्रियतमां हृदयफलके सङ्कल्पतूलिकया लिखितामिवावलोकयन्निस्पन्दकरणग्रामः कन्दर्पकेतुर्मकरन्दविरचिते पल्लवशयने सुष्वाप। अथ याममात्रावखण्डितायां यामवत्यां तत्र जम्बूतरुशिखरे मिथः कलहायमानयोः शुकसारिकयोः कलकलं श्रुत्वा कन्दर्पकेतुर्मकरन्दमुवाच वयस्य! शृणुमस्तावदनयोरालापम्' इति। ततो जम्बूनिकुञ्जस्थिता शारिका काचिच्चिरादागतं शुकं प्रकोपतरलाक्षरमुवाच-- 'कितव! शारिकान्तरमन्विष्य समागतोऽसि। कथमन्यथा रात्रिरियती तव' इति। अथ तच्छ्रुत्वा शुकस्तामवादीत्- 'भद्रे ! मुञ्च कोपम्। अपूर्वाद्य बृहत्कथा मया श्रुता प्रत्यक्षीकृता च तेनायं कालातिपातः।' इति । अथ समुपजातकुतूहलया शारिकया मुहुर्मुहुरनुबध्यमानः कथां कथयितुमारेभे।

अस्ति मन्दरगिरिशृङ्गैरिव प्रशस्तसुधाधवलैः बृहत्कथालम्बैरिव सालभञ्जिकोपशोभितैः, वृत्तैरिव समाणवकक्रीडितैः, करियूथैरिव समत्तवारणैः, सुग्रीवसैन्यैरिव सगवाक्षैः, बलिभवनैरिव सुतलसन्निवेशैः, वेश्मभिरुद्भासितम्। धनदेनापि प्रचेतसा, गोपलेनापि रामेण, प्रियंवदेनापि पुष्पकेतुना, भरतेनापि लक्ष्मणेन, तिथिपरेणाप्यतिथिसत्कारप्रवणेन, असंख्येनापि संख्यावता अमर्मभेदिनाऽपि वीरतरेण, अपतितेनापि नानासवासक्तेन, सुदर्शनेनाप्यचक्रेण, अजातमदेनापि सुप्रतीकेन, हंसेनाप्यपक्षपातिना, अविदितस्नेहक्षयेणापि कुलप्रदीपेन, अग्रन्थिनापि वंशपोतेन, अग्रहेणापि काव्यजीवज्ञेन, निदाघदिवसेनेव वृषवर्धितरुचिना, माघविरामदिवसेनेव तपस्यारम्भिणा, नभस्वतेव सत्पथगामिना विवस्वतेव गोपतिना, महेश्वरेणेव चन्द्रं दधता निवासिजनेनानुगतम्। घनापगमेनेव दर्शितखण्डाभ्रेण, वेलातटेनेव प्रवालमण्डनेन। देवाङ्गनाजनेनेव इन्द्राणीपरिचयविदग्धेन गजेन्द्रेणेव पल्लववर्धितरुचिना, कोकिलेनेव परपुष्टेन, भ्रमरेणेव कुसुमेषुलालितेन, जलौकसेव रक्ताकृष्टिनिपुणेन यायजूकेनेव सुरतार्थिना, महानटबाहुनेव बद्धभुजङ्गाङ्केन, गरुडेनेव विलासिहृदयतापकारिणा बन्धकेनेव शूलानामुपरिगतेन वेश्याजनेनाधिष्ठितं कुसुमपुरं नाम नगरम्।

यत्र च सुरासुरमौलिमालालाक्षतचरणारविन्दा, शुम्भनिशुम्भमहासुर-बलमहावनदावज्वाला, महिषासुरगिरिवरवज्रधारा, प्रणयकलहप्रणतगङ्गाधरजटाजूटकोटि-स्खलितजाह्ववीजलधाराधौतपादपद्मा, भगवती कात्यायनी चण्डाभिधाना स्वयं निवसति। यस्य च परिसरे सुरासुरमज्जनगलितकुसुममुकुटरजोराजिपरिमलवाहिनी, पितामहकमण्डलुविनिर्गतघर्मद्रवधारा, धरातलसगरसुतशतसुरनगरसमारोहणपुण्यरज्जुनिः-श्रेणिका ऐरावतकपोलकषणकम्पिततटगतहरिचन्दनस्यन्दमानरससुरभितसलिला, सलीलसुरसुन्दरीनितम्बबिम्बाद्दतितरलिततरङ्गा, स्नानावतीर्णसप्तर्षिमण्डलविमल-जटाटवीपरिमलपुण्यवेणिः, एणतिलकमुकुटविकटजटाजूटकुहरभ्रान्तिजनितसंस्कारेवाद्यापि कुटिलावर्ता, धरणीव सार्वभौमकरस्पर्शोपभोगक्षमा, जलदकालसरसीव गन्धपरिभ्रमद्भ्रमरमालानुमीयमानजलमूलमग्नकुमुदपुण्डरीका, छन्दोविचितिरिव मालिनीसनाथा, ग्रहपङ्क्तिरिव सूर्यात्मजोपशोभिता सराजहंसा च, शरत्कालदिनश्रीरिव उज्ज्वलत्कोकनदा, प्रबुद्धपुण्डरीकाक्षा च, हृतान्धतमसापि तमसान्विता, वीचिकलिताप्यवीचिदुर्गमा, भगवती भागीरथी वहति।

यच्च दिशि दिशि सन्तानकतरुकुसुमनिकरमिव शिखरावलग्नं तारागणमिव कुसुमनिकरमुद्वहद्भिः, उत्तम्भितजलदैः, अनूरुकशाभिघातपरवशरविरथतुरग-

ग्रासविषमिताग्रपल्लवैः, चन्द्रचमूरुचरणसङ्क्रान्तामृतकणनिकरसेकसञ्जातबहुलसुकुमार-नवकिसलयसहस्रदर्शिताकालसन्ध्याकालविभ्रमैः, भरतचरितैरिव सदारामाश्रितैः महावीरैरिव नारिकेलिधरैः, असंस्कृततरुणैरिव अतिदूरप्रसारिताक्षैः, तपस्विभिरिव जपासक्तैः, प्रसाधितैरिव कृतमालोपशोभितैः, मातङ्गकुम्भस्थलविदारणोत्सुकसिंहैरिव उत्फुल्लकेसरैः, सारिष्टैरपि चिरजीविभिः, मुनियुतैरपि मदनाधिष्ठितैः, उपवनपादपैरुपशोभितम्। अदितिजठरमिव अनेकदेवकुलाध्यासितम्। पातालमिव महाबलिशोभितं भुजङ्गाधिष्ठितं च। ससुरालयमपि पवित्रम्, भोगियुक्तमप्यनुपद्रवम्।

तत्र सुरतरभसखिन्नप्रसुप्तसीमन्तिनीरत्नताटङ्किमुद्राङ्कितबाहुदण्डः' प्रचण्डप्रतिपक्षलक्ष्मीकेशपाशकुसुममालाऽऽमोदसुरभितकरकमलः, प्रशस्तकेदार इव बहुधान्यकार्यसम्पादकः, पार्थ इव सुभद्रान्वित सभीमसेनश्च कृष्णइव सत्यभामोपेतः सबलश्च, शृङ्गारशेखरो नाम राजा प्रतिवसति स्म। यो बलभित्, पावकः, धर्मराट्, निर्ऋतिः, प्रचेताः, सदागतिः, धनदः शङ्कर इत्यष्टमूर्तिरप्यनष्टमूर्तिः।

सुराणां पाताऽसौ स पुनरतिपुण्यैकहृदयो
ग्रहस्तस्यास्थाने गुरुरुचितमार्गे स निरतः।
करस्तस्यात्यर्थं वहति शतकोटिप्रणयितां
स सर्वस्वं दाता तृणमिव सुरेन्द्रं विजयते।।

जीवाकृष्टिं स चक्रे मृधभुवि धनुषः शत्रुरासीद्गतासु-
र्लक्षाप्तिर्मार्गणानामभवदरिबले तद्यशस्तेन लब्धम्।
मुक्ता तेन क्षमेति त्वरितमरिबलैरुत्तमाङ्गैःप्रतिष्ठा
पञ्चत्वं द्वेषिसैन्यैर्गतमवनिपतिर्नापसंख्यान्तरं सः।।

यत्र राजनि राजनीतिचतुरे, चतुरम्बुधिमेखलां शासति वसुमतीम् पितृकार्येषु वृषोत्सर्गः, शशिनः कन्यातुलारोहणम्, योगेषु शूलव्याघातचिन्ता, दक्षिणवामकरणं दिङ्निश्चयेषु, दानच्छेदः करिकपोलेषु, शरभेदो दधिषु, शृङ्खलाबन्धो वर्णग्रथनासु, उत्प्रेक्षाक्षेपः काव्यालङ्कारेषु, लक्षदानच्युतिः सायकानां, क्विपां सर्वविनाशः, कोषसङ्कोचः कमलाकरेषु, न जनेषु जातिविहीनता मालासु न कुलेषु, शृङ्गारहानिः जरत्करिषु न जनेषु, दुर्वर्णयोगः कटकादिषु न कामिनीकान्तिषु, गान्धारविच्छेदो रागेषु न पौरवनितासु, मूर्च्छाधिगमो गानेषु न प्रजासु, खर्माभावो नीचसेवकेषु न परिजनेषु, मलिनाम्बरत्वं निशासु न जनेषु, चलरागता गीतेषु न विदग्धेषु, वृषहानिः निधुवनलीलासु न पौरेषु, भङ्गुरत्वं रागविकृतिषु न चित्तेषु, अनङ्गता कामदेवे न परिजने, मारागमो यौवनोदयेषु न प्रकृतिषु, द्विजाघातः सुरतेषु न प्रजासु, रसनाबन्धो रतिकलहेषु न दानानुमतिषु, अधररागता तरुणीषु न परिजनेषु, कर्तनमलकेषु न पुरन्ध्रीषु, निस्त्रिंशत्वमसिषु न मनस्सु करवालनाशो योधेषु न जनपदेषु परमेवं व्यवस्थितम्।

तस्य चाभूदेवंविधस्य राज्ञो महिषी दिग्गजमदरेखेवानन्दितालिगणा, पार्वतीव सुकुमारा चन्द्रलेखालङ्कृता च, वनराजिरिव नवमालिकोद्भासिता सचित्रका च, अप्सरःसंहतिरिव संहतसुकेशी समञ्जुघोषा च, सर्वान्तःपुरप्रधानभूता अनङ्वती नाम। तयोश्च मध्यमोपान्ते वयसि वर्तमानयोः कथमपि दैववशात्, त्रिभुवनविलोभनीयाकृतिः, पुलोमतनयेवानन्दितसहस्रनेत्रा, मेरुगिरिमेखलेव सुजातरूपा, शरन्निशेव उल्लसत्तारका, सत्परिषदिव अच्छिद्रद्विजपङ्क्तिभूषिता, राक्षसकुललक्ष्मीरिव माल्यवत्सुकेशशोभिता, तनयाऽभूद्वासवदत्ता नाम। अथ सा रावणभुजवन इव उल्लसितगोत्रे, विन्ध्याचल इव मदनालङ्कृते, पारावार इव सञ्जातलावण्ये, नन्दनवन इव सदाकल्पतरुणाभिनन्दिते, पवन इव सुमनोहरे, परिणाममुपयात्यपि यौवने परिणयपराङ्मुखी तस्थौ।

अथैकदा विजृम्भमाणसहकारकोरकनिकुरुम्बनिपतितमधुकरमाला मदकलहुङ्कारजनितपथिकजनसञ्ज्वरः, कोमलमलयमारुतोद्धूतचूतप्रसवरसास्वादकषायकण्ठकलकण्ठकुहूरुतभरितसकलदिङ्मुखः, विकचकमलषण्डनिलीय-मानसमत्तहंसकुलकोलाहलमुखरितसकलसरोवरः, परभृतखरनखत्रोटिकोटिपाटित-पाटलीकुड्मलवृन्तविवरविनिर्गतमधुधारासारशीकरनिकरसमालब्धदक्षिणसमीरणमारवारण-व्रणितपथिकवधूहृदयतटः, मधुमदमुदितकामिनीमुखकमलगण्डूषशीधुसेकपुलकितबकुलः,

मदनरसपरवशविलासिनीतुलाकोटिविकटचटुलचरणाऽरविन्दमन्दप्रहारहृष्टकङ्कोलितरुशतः, प्रतिदिशमश्लीलप्रायवैहासिकगीयमानगीतश्रवणोत्सुकषिड्गजनसमारब्धचर्चरीताला-कर्णनमुह्यदनेकपथिकः, दुर्जन इव सतामरसः, दुष्कुल इव जातिहीनः, रावण इवापीतलोहितपलाशशतसेवितः, महाश्रृङ्गारीव सुगन्धवहः, सुराजेव समृद्धकुवलयः, वास्तुक इव विवर्धितसुखाशः, सत्कविकाव्यबन्ध इव अनवबद्धतुहिनपातः, सत्पुरुष इव दोषानुबन्धरहितः, कैवर्त्त इव बद्धराजीवोत्पलसालः, समृद्धकासारशकुनिसार्थ इव निन्दितमरुबकः, शुक्र इवेन्द्राणीरुचिरः, महावीर इवाधरीकृतदमनकः षिड्ग इवाम्लानसुभगो वसन्तकाल आजगाम।

अतिदूरप्रवृद्धेन मधुना जगति को वा न विक्रियते, यदतिमुक्तको मुनिरपि विचकास। कुसुमशरस्य नवचूतप्रसवशरमूले निलीयमाना मधुकरावलिर्नामाक्षरपंक्तिरिव रेजे। वृन्तविनिर्गतविकचविचिकिलकलिकाविवरे मञ्जु गुञ्जन्मधुकरो मकरकेतोस्त्रिभुवनविजयप्रयाणशङ्खध्वनिमिव चकार। नवयावकपङ्कपल्लवितसनूपुरतरुणीचरणप्रहारानुरागवशान्नवकिसलयच्छलेन तमिव रागमुदवहदशोकः। मधुरमधुपरिपूरितकामिनीमुखकमलगण्डूषसेकादिव तद्रसगन्ध-मात्मकुसुमेषु विभ्रद्बकुलतरू रराज। अन्तरान्तरानिपतितमधुकरनिकरकिर्मीरः

कङ्केलिगुच्छोऽर्धनिर्वाणमनोभवचिताचक्रानुकारी पथिकजनहृदयदाहमुवाह। विकचविचिकिलराजिरलिकुलशबला कलितेन्द्रनीला मुक्तावलीव मधुश्रियो रुरुचे। विरहिणां हृदयमथनाय कुसुमशरस्य शरशाणचक्रमिव नागकेसरकुसुममशोभत। पथिकजनहृदयमत्स्यं ग्रहीतुं मकरकेतोः पलाव इव पाटलिपुष्पमदृश्यत।

कन्दर्पकेलिसम्पल्लम्पटलाटीललाटतटलुलितालकधम्मिल्लभारबकुलकुसुमपरिमलमेलनसमृद्धमधुरिमगुणः, कामकलाकलापकुशलचारुकर्णाटसुन्दरीस्तनकलशघुसृणधूलिपटलपरिमलामोदवाही, रणरणकरसितापरान्तकान्तकुन्तलोल्ललनसङ्क्रान्तपरिमलमिलितालिमालामधुरतरझङ्काररवमुखरितनभःस्थलः, नवयौवनरागतरलकेरलीकपोलपालिपद्मावलीपरिचयचतुरः, चतुःषष्टिकलापविदग्धमुग्धमालवनितम्बिनीनितम्बबिम्बसंवाहनकुशलः, सुरतश्रमपरवशान्ध्रपुरन्ध्रीनीरन्ध्रपीनपयोधरभारनिदाघजलकणनिकरशिशिरितो मलयमारुतो ववौ।

अत्रान्तरे वासवदत्तासखीजनाद्विदितसुताभिप्रायः शृङ्गारशेखरः स्वसुतायाः स्वयंवरार्थमशेषधरणितलभाजां राजपुत्राणामेकत्र मेलनमकरोत्। ततो दग्धकृष्णागुरुपरिमलामोदमोहितमधुव्रतव्रातबहुलगुमगुमायितमुखरितम्, अतिरभसहासच्छटादीधितिधवलिमपरिमिलितम्, अनेकपरिहासकथाकलापविदग्धशृङ्गारम-

पजननिचयसमाकुलम्, दह्यमानमहिषाक्षादिसुगन्धिद्रव्यसौरभाकृष्टपुरोपवनषट्पद-कुलसमाकुलम्, अर्जुनसमरमिव नन्दिघोषमुखरितदिगन्तरम्, नृपास्थानमिव सराजोपहारम्, तापसाश्रममिव वितानोद्भासितम्, त्रिविष्टपमिवसुमनोऽलङ्कृतं मञ्चमारुरोह वरारोहा वासवदत्ता।

तत्र च केचित् कलाङ्कुरा इव विदितनगरमण्डनाः, अपरे पाण्डवा इव दिव्यचक्षुःकृष्णागुरुपरिमिलिताः, अन्ये शरद्दिवसा इव दूरप्रवृद्धाशाः, इतरे प्रहर्तुमुद्यता इव स्वबलार्थिनः, केचिद् व्याधा इव शकुनश्रावकाः, केचिदाखेटासक्ता इव रूपानुसारप्रवृत्ताः, केचिज्जैमिनिमतानुसारिण इव तथागतमतध्वंसिनः, केचित्खञ्जना इव सांवत्सरफलदर्शिनः, केचित्सुमेरुपरिसरा इव कार्तस्वरमयाः, केचित्कुमुदाकरा इव भास्वद्दर्शननिमीलिताः, केचिद्धार्तराष्ट्रा इव विश्वरूपावलोकनजनितेन्द्रजालाद्भुतप्रत्ययाः, केचिदात्मनि वारणबुद्ध्या बलवन्तोऽपि सुवाह्याः, केचित्पाणिग्रहणार्थिनोऽप्यसुकरं मन्यमानाः, केचिदधरीकृता अपि स्थिराः, केचित्पाण्डुपुत्रा इवाक्षहृदयाज्ञानहृतक्षमाः, केचिद् बृहत्कथानुबन्धिन इव गुणाढ्याः, केचित्तिर्यग्गतय इव सुगन्धवाह्याः, केचित्कौरवसैनिका इव द्रोणाशासूचकाः, केचित्कुमुदाकरा इवासोढशूरभासः, सा च क्षणेनैकैकशः समवलोक्य विरक्तहृदया सती तस्मात्कर्णीरथादवततार।

अथ तस्यामेव रात्रौ सा स्वप्ने, बालिनमिवाङ्गदोपशोभितम्, कुहूमुखमिव हारिकण्ठम्, कनकमृगमिव रामाकर्षणनिपुणम्, जयन्तमिव वचनामृतानन्दितवृद्धश्रवसम्, कृष्णमिव कंसहर्षं न कुर्वन्तम्, महामेघमिव विलसत्करकम्, समुद्रमिव महासत्त्वम्, मालिन्या कवरिकया, तुङ्गभद्रया नासिकया, शोणेनाधरेण, नर्मदया वाचा, गोदया भुजया स्वर्वाह्निन्या कीर्त्या च पुण्यसरिन्मयमिव, आदिकन्दं शृङ्गारपादपस्य, रोहणगिरिं सकुलगुणरत्नसमूहस्य, प्रभवशैलं सुन्दरकन्दर्पकथानदीनाम्, सुरभिमासं वैदग्ध्यसहकारस्य, आदर्शतलं सौजन्यमुखस्य, आदिबीजं विद्यालतानां, कोशगृहं महासौन्दर्यधनस्य, मूलगृहं शीलसम्पदः, स्वयंवृतपतिं कीर्तेः, स्पर्द्धागृहं लक्ष्मीसरस्वत्योः त्रिभुवनविलोभनीयाकृतिं कञ्चिद्युवानं ददर्श।

स चिन्तामणिनाम्नो राज्ञस्तनयः कन्दर्पकेतुरिति स्वप्न एव तन्नामादिकमशृणोत्। अनन्तरम् 'अहो प्रजापते रूपनिर्माणकौशलम्। मन्ये, स्वस्यैव नैपुण्यस्यैकत्र दर्शनोत्सुकमनसा वेधसा जगत्त्रयसमवायिरूपपरमाणूनादाय विरचितोऽयमिति; अन्यथा कथमिवास्य कान्तिविशेष ईदृशो भवति। वृथैव दमयन्ती नलस्य कृते वनवासवैशसमवाप। मुधैवेन्दुमती महिष्यप्यजानुरागिणी बभूव। विफलमेव दुष्यन्तस्य कृते दुर्वाससः शापमनुबभूव शकुन्तला। निरर्थकमेव मदनमञ्जरी नरवाहनदत्तं

चकमे। निष्कारणमेव ऊरुगरिमनिर्जितरम्भा रम्भा नलकूबरमचीकमत। व्यर्थमेव धूमोर्णा स्वयं स्वयंवरार्थमागतेषु देवगणेषु धर्मराजमाचकाङ्क्ष। निष्प्रयोजनमेव ऋद्धिर्गन्धर्वपक्षेषु कुबेरमाससाद। अहेतुकमेव पुलोमतनया देवेन्द्रासक्तचित्ता बभूव।' इति बहुविधं चिन्तयन्ती; विरहमुर्मुरमध्यमधिरूढेव, मदनदावाग्निशिखाकवलितेव, वसन्तकालाग्निगृहीतेव, दक्षिणमारुतरुद्रपावकग्रस्तेव, उन्मादपातालगृहं प्रविष्टेव, शून्यकरणग्रामेव वर्तमाना; हृदये विलिखितमिव, उत्कीर्णमिव, प्रत्युप्तमिव कीलितमिव, निगलितमिव, वज्रलेपघटितमिव अस्थिपञ्जरप्रविष्टमिव, मर्मान्तरस्थितमिव, मज्जारसशवलितमिव, प्राणपरीतमिव' अन्तरात्मानमधिष्ठितमिव, रुधिराशये द्रवीभूतमिव, पललसंविभक्तमिव, कन्दर्पकेतुं मन्यमाना; उन्मत्तेव, अन्धेव, बधिरेव, मूकेव, शून्येव, निरस्तेन्द्रियग्रामेव, मूर्च्छागृहीतेव, ग्रहग्रस्तेव, यौवनसागरतरलतरङ्गपरम्परापरिगतेव, रागरज्जुभिः परिवारितेव, कन्दर्पकुसुमबाणैः कीलितेव, शृङ्गारभावनाविषरसघूर्णितेव, रूपपरिभावनाशल्यकीलितेव, मलयानिलापहृतजीवितेव भवन्ती; 'हा प्रिये सख्यनङ्गलेखे! वितर हृदये मे पाणिपद्मम्, दुःसहो विरहसन्तापः। मुग्धे मदनमञ्जरि! सिञ्चाङ्गानि चन्दनवारिणा। सरले वसन्तसेने ! संवृणु केशपाशम् । तरले तरङ्गवति ! विकिराङ्गेषु कैतकधूलिम्। वामे मदनमालिनि ! कलय वलये शैवालकलापेन। चपले चित्रलेखे !

चित्रपटे विलिख चित्तचोरं जनम्। भाविनि विलासवति ! विक्षिपावयवेषु मुक्ताचूर्णनिदानम्। रागिणि रागलेखे! स्थगय निलिनीदलनिचयेन पयोधरभारम् । सुकान्ते कान्तिमति ! मन्दं मन्दमपनय बाष्पबिन्दून्। यूथिकालङ्कृते यूथिके ! सञ्चारय नलिनीदलतालवृन्तेनार्द्रवातान्। एहि भगवति निद्रे! अनुगृहाण माम्, धिक्, इन्द्रियैरपरैः, किमिति लोचनमयान्येव न कृतान्यङ्गानि विधिना। भगवन् कुसुमायुध तवायमञ्जलिः, अनुवशो भव भाववति मादृशे जने। मलयानिल सुरतमहोत्सवदीक्षागुरो वह यथेष्टम्, अपगता मम प्राणाः, इति बहुविधं भाषमाणा वासवदत्ता सखीजनेन समं सम्मुमूर्च्छ।

अनन्तरं परिजनप्रयत्नोच्छ्वसितजीविता सती, क्षणमतिशिशिरघनसाररसाकुलनिम्नगाकूलपुलिने, क्षणमतितुहिनमलयजरससारसरित्परिसरे, क्षणमरविन्दकाननपरिवारितसरस्तटविटपिच्छायासु, क्षणं नलिनीदलसंस्तरेषु, क्षणं तुषारसंघातशिशिरितशिलातलेषु परिजनेन नीयमाना प्रलयकालोदितद्वादशरविकिरणकलापतीव्रविरहानलदह्यमानामतिकृशां विप्राणामिव तनुं बिभ्रती सा, प्रचलदमन्दमन्दरान्दोलितदुग्धसिन्धुतरलतरङ्गच्छटाधवलहासच्छु-रिताधरपल्लवं तन्मुखारविन्दं द्विजकुलमिव श्रुतिप्रणयि तदीक्षणयुगलम्,

सहृजसुरभिमुखपरिमलमाघ्रातुकामेव दूरविनिर्गता तन्नासावंशलक्ष्मीः, कलङ्कमुक्तेन्दुकलाकलापकोमला, पीयूषफेनपटलपाण्डुरा तदि्द्वजपङ्क्तिः, अदृष्टचरमनङ्गातिशायि तद्रूपम्, धन्यानि तानि स्थानानि, ते जनपदाः पुण्याः, तानि नामाक्षराणि सुकृतभाञ्जि, यान्यमुना परिष्कृतानि, इति मुहुर्मुहुः परिभावयन्ती; दिक्षु विलिखितमिव, नभस्युत्कीर्णमिव, लोचने प्रतिबिम्बितमिव, चित्रपटे पुरोदर्शितमिव, तमितस्ततो विलोकयन्ती व्यतिष्ठत ।

अथ तस्यास्तमालिका नाम शारिका तत्प्रियसखीभिः समं समालोच्य कन्दर्पकेतोर्भावमाकलयितुं प्रेषिता। सापि मया सार्धं प्रस्थिता गता चात्रैव तरोरधस्तात्तिष्ठति, इत्युक्त्वा विरराम।

अथ तच्छ्रुत्वा सहर्षं समुत्थाय मकरन्दस्तां तमालिकामाहूय विदितवृत्तान्तामकरोत्। सा तु तस्मै कृतप्रणामा तां पत्रिकामुपानयत् । अथ मकरन्दस्तामादाय पत्रिकां विस्रस्य स्वयमेवावाचयत्। प्रत्यक्षदृष्टभावाप्यस्थिरहृदया हि कामिनी भवति। स्वप्नानुभूतभावा द्रढयति न प्रत्ययं युवतिः ।।

तच्छ्रुत्वा कन्दर्पकेतुरमृतार्णवनिमग्नमिव, सर्वानन्दानामुपरिवर्तमानमिवात्मानं मन्यमानो मन्दं मन्दमुत्थाय प्रसारितबाहुयुगलस्तमालिकामालिलिङ्ग । अथ तयैव सार्धं

समासीनः, किं करोति, किं वदति कथमास्ते इत्यादि सकलं वासवदत्तावृत्तान्तमपृच्छत् । तं च दिवसं तत्रैवातिवाह्य तस्मात्प्रदेशात्तया सहोच्चचाल ससुहृत्कन्दर्पकेतुः। अत्रान्तरे भगवानपि मरीचिमाली वृत्तान्तममुं कथयितुमिव मध्यमं लोकमवततार।

अथ वासरताम्रचूडचूडाचक्राकारः चकवाक्रहृदयसङ्क्रमितसन्तापतयेव मन्दिमानमुद्वहन्, अस्तगिरिमन्दारस्तबकसुन्दरः, सिन्दूरराजिरञ्जित-सुरराजकुम्भिकुम्भविभ्रमं बिभ्राणः, ताण्डवचण्डवेगोच्चलितधूर्जटिजटा-जूटमुकुटबद्धबन्धुरविकटवासुकिभोगमणिताटङ्कसनाभिमण्डलः, सन्ध्यासन्धिनी-सरसयावकपत्रचारुः, वारुणीवारविलासिन्यरुणमणिकुण्डलकान्तिः, कालकरवालकृत्तवासरमहिषस्कन्धचक्राकारः, मधुरमधुपूर्णकपाल इव गगनकपालिनः, अम्लानकुसुमस्तबक इव नभःश्रियः, पुष्पगुच्छ इव गगनाशोकतरोः, कनकदर्पण इव प्रतीचीविलासिन्याः, बलभद्र इव वारुणीसङ्गतः सरागश्च, दुर्विध इव परित्यक्तवसुः सविषादश्च, शाक्यवंश इव रक्तांशुकधरः, सूरिविव संज्ञोपेतः, भगवान् दिनमणिरपराकूपारपयसि तरलतरङ्गवेगोच्चलितविद्रुमविटपाकृतिर्ममज्ज।

ततः क्रमेण च रजोविलुठितोत्थितकुलायार्थिपरस्परकलहविकलकल-विङ्ककुलकलकलवाचालशिखरेषु शिखरिषु, वसतिसाकाङ्क्षेषु ध्वाङ्क्षेषु, अनवरत-

दह्यमानकालागुरुधूपपरिमलोद्गारेषु वासागारेषु, दूर्वाञ्चिततटिनीतटनिविष्टविदग्ध-जनप्रस्तूयमानकथाश्रवणोत्सुकशिशुजनकलकलरवनिवारणक्रुद्धेषु वृद्धेषु, आलोलिका-तरलरसनाभिः कथितबहुकथाभिर्जरतीभिरतिलघुकरताडनजनितसुखे ताभिरनुगते शिशयिषमाणे शिशुजने, विरचितकन्दर्पमुद्रासु क्षुद्रासु, कामुकजनानुबध्यमान-दासीजनविविधाश्लीलवचनशतविरसीकृतश्रुतिषु, सन्ध्यावन्दनोपविष्टेषु शिष्टेषु, रोमन्थमन्थरकुरङ्गकुटुम्बकाध्यास्यमानम्रदिष्ठगौष्ठीनपृष्ठासु अरण्यस्थलीषु, निद्राविद्राणकाककुलकलितकुलायेषु, ग्रामतरुनिचयेषु, कापेयविकलकपिकुल-कलिलेष्वारामतरुषु, निर्जिगमिषति जरत्तरुकोटरकुटीरकुटुम्बिनि कौशिककुले, तिमिरतर्जननिर्गतासु दहनप्रविष्टदिनकरकरशाखास्विव प्रस्फुरन्तीषु दीपलेखासु, मुखरितधनुषि वर्षति शरनिकरमशेषसांसारिकशेमुषीमुषि मकरध्वजे, सुरतारम्भाकल्पशोभिनि, शम्भलीभाषितभाजि भजति भूषां भुजिष्याजने, सैरन्ध्रीबध्यमानरशनाकलापजल्पाकजघनस्थलासु जनीषु, विश्रान्तकथानुबन्धतया प्रवर्तमानानेकजनगृहगमनत्वरेषु चत्वरेषु, समासादितकुक्कुटेषु किरातगृहनिष्कुटेषु, कृतयष्टिसमारोहणेषु बर्हिणेषु, विहितसन्ध्यासमयव्यवस्थेषु गृहस्थेषु, सपदि सङ्कोचोदञ्चदवाञ्चदुच्चकेसरकोटिसङ्कटकुशेशयोदरकोटरकुटीरकुटिलशायिनि

षट्चरणचक्रे, अनेनैव पथा भगवता भानुमता गन्तव्यमिति सर्वतः पट्टमयैर्वसनैः परिवृता मणिकुट्टिमालिरिव विरचिता वरुणेन रवेः, कालकरवालकृत्तस्य दिवसमहिषस्य रुधिरधारेव, विद्रुमलतेव चरमार्णवस्य, रक्तकमलिनीव गगनतटाकस्य, काञ्चनकेतुरिव कन्दर्परथस्य, मञ्जिष्ठारागारुणपताकेव गगनहर्म्यतलस्य, लक्ष्मीरिव स्वयंवरगृहीतपीताम्बरा, भिक्षुकीव तारानुरक्ता, रक्ताम्बरधारिणी, वारमुख्येव पल्लवानुरक्ता, कामिनीव कालेयाताम्रपयोधरा बभ्रुरिव कपिलतारका भगवती सन्ध्या समदृश्यत।

ततः क्षणेन क्षणदानुरागचतुरासु सन्ध्यास्विव वेश्यासु, तुलाधारशून्यायां पण्यवीथिकायामिव दिवि, घनघटमानदलपुटासु पुटकिनीषु तिमिरप्रतिहतेष्विव तत इतः परिभ्रमत्सु कमलसरसि मधुकरनिकरेषु, विकलकुररीकूजितच्छलेन रविविरहविधुरासु विलपन्तीष्विव सरोजिनीषु, प्रतिफलितसन्ध्यारागरज्यमानसलिलस्थितासु पतिविनाशहृत्पीडया दहनप्रविष्टास्विव कमलिनीषु गणक इव नक्षत्रसूचके प्रदोषे, हरकण्ठकालिमसनाभि, दैत्यबलमिव प्रकटतारकम्, भारतसमरमिव वर्धमानोलूकशकुनिकलकलम्, धृष्टद्युम्नवीर्यमिव कुण्ठितद्रोणप्रभावम्, नन्दनवनमिव सञ्चरत्कौशिकम्, कृष्णवर्त्मज्वलनमिव निखिलकाष्ठापहारकम्, सगर्भमिव घनतरपाषाणकर्कशासु गिरितटीषु, सचक्षुरिव सुप्तप्रबुद्धसिंहनयनच्छविच्छटाकपिलेषु

सानुषु सजीवमिव तमोमणिभिः, संवर्धितमिवाग्निहोत्रधूमलेखाभिः, मांसलितमिव कामिनीकेशपाशसंस्कारागुरुधूमपटलैः, उद्दीपितमव घनतरनिलीनमधुकरपटलमेचकित-पेचकिकपोलतलगलितदानधाराशीकरैः, पुञ्जीकृतमिव विततत‌मालकाननच्छटाच्छायासु, लीयमानमिव कज्जलरसश्यामभोगिभोगेषु प्रावरणमिव रजनीपांसुलायाः, पलितौषधमिव वृद्धवारविलासिन्याः, अपत्यमिव रजन्याः, सुहृदिव कलिकालस्य, मित्रमिव दुर्जनहृदयस्य, बौद्धदर्शनमिव प्रत्यक्षद्रव्यमपह्नुवानं तिमिरमुदजृम्भत।

मुदितमिव मत्तमातङ्गमनोहरगण्डमण्डले, फलितमिवातिसान्द्रबहल-च्छदतमालकानने, परिस्फुरितमिवातिक्रान्तकान्ताजनघनतरकेशपाशसंहतौ, उन्मीलितमिवेन्द्रनीलरश्मिषु, अतिशयमांसलितमिवावटतटेषु, साटोपमिव स्फुटपाटवोत्कटविशङ्कटानेकविटपिविटपोत्कटस्फुटकुसुमपुटपिहितपदषट्पदावलिषु, घनतरघोरदन्तिघस्मरविषधरभोगभासुरम्, मदभरमत्तदन्तिदन्तद्युतितर्जनजर्जरितम्, दिवाकरोदयारम्भणमिव सङ्कुचत्कुवलयम्, असतां महत्त्वमिव तिरस्कृतसकलान्तरम्, निमीलन्नीलोत्पलव्याजरचिताञ्जलिपुटेन नमदिवागतं निशापतिं तिमिरमजायत ।

अथ क्षणेनैव सन्ध्याताण्डवाडम्बरोच्चलितमहानटजटाजूटकूटकुटिल-स्खलनविवर्तितजह्नुकन्यावारिधाराबिन्दव इव विकीर्णाः, दुर्भरधर-

णिभारभुग्नभीमदिङ्मत्तमातङ्गमण्डलकरविमुक्तशीकरच्छटा इव तताः, अतिदवीयोनभस्तलभ्रमणखिन्नदिनकरतुरङ्गमास्यविवरवान्तफेनस्तबका इव विस्तीर्णा, गगनमहासरःकुमुदसन्दोहसन्देहदायिनः, विश्वं गणयतो विधातुः शशिकठिनीखण्डेन तमोमषीश्यामेऽजिन इव वियति संसारस्यातिशून्यत्वात् शून्यबिन्दव इव विलिखिताः, जगत्त्रयविजिगीषाविनिर्गतस्य मकरकेतो रतिकरविकीर्णा इव लाजाञ्जलयः गुलिकास्त्रगुलिका इव विक्षिप्ताः पुष्पधनुषः, वियदम्बुराशिफेनस्तबका इव वितताः, रतिविरचिता गगनाङ्गणे आतर्पणपञ्चाङ्गुलय इव, व्योमतललक्ष्मीहारमुक्तानिकरा इव विशीर्णाः, हरकोपानलदग्धकामचिताचक्रादिन्दोर्वात्यावेशविप्रकीर्णाः कामकीकसखण्डा इव, तिमिरोद्गमधूमधूमलसन्ध्यानलपरितप्तगगनकटाहभृज्ज्यमानस्फुटितलाजानुकारिण्यस्तारा व्यराजन्त। एताभिः श्वित्रीव वियदशोभत।

ततो दीर्घोच्छ्वासरचनाकुलं सुश्लेषवक्त्रघटनापटु सत्कविवचनमिव चक्रवाकमिथुनमतीवाखिद्यत। कमलिनीसञ्चरणलग्नमकरन्दबिन्दुसन्दोहलुब्ध-मुग्धमुखरमधुकरमालाशबलगात्रम्, कालपाशेनेव मूर्तिमद्रामशापेनेवाकृष्यमाणं चक्रवाकमिथुनं विजघटे । रविविरहविधुरायाः कमलिन्या हृदयमिव द्विधा पपाट चक्रवाकमिथुनम्। आगमिष्यतो हिमकरदयितस्य पार्श्वे सञ्चरन्ती कुमुदिन्या भ्रमरमाला

दूतीवालक्ष्यत। तारकानयनजलबिन्दुभिरस्तंगतस्य दिवाकरदर्पितस्य शोकादिव ककुभो व्यरुदन्। भास्वतो निजदयितस्य विरहादभिनवकिञ्जल्कराजिव्याजेन शोकानलमुर्मुरो नलिनीकोशहृदये जज्वाल। ततो रविरश्मिदावाग्निभस्मीकृतनभोवनमषीराशिरिव, श्रुतिवचनमिव क्षपितदिगम्बरदर्शनम्, कृष्णरूपमपि तिरस्कृतविश्वरूपभावविशेषम्, सद्योद्रावितराजतपटद्रवप्रवाह इव शार्वरमन्धतमसमजृम्भत ।

अथ क्षणेन क्षणदाराजकन्याकन्दुक इव, कन्दर्पकनकदर्पण इव, उदयगिरिबालमन्दारपुष्पस्तबक इव, प्राचीललनाललामललाटतटघटित-बन्धूककुसुमतिलकचक्राकारः, कनककुण्डलमिव नभःश्रियः, दिग्वधूप्रसाधिकाहस्त-स्रस्तालक्तकपिण्ड इव, शातकुम्भकुम्भ इव गगन सौधतलस्य, प्रस्थानमङ्गलकलश इव त्रिभुवनविजयविनिर्गतस्य मकरकेतोः, कन्दर्पकार्तस्वरतूणमुखकान्तितस्करः, प्राच्यशैलशिखराग्रप्ररूढजपाकुसुमच्छविः, स्वच्छकुङ्कुमपिण्डपूर्णपात्रमिव निशाविलासिन्याः कुङ्कुमारुणैकस्तनकलश इव आखण्डलाशाङ्गनायाः, गगनगामिविद्याधरीकरत-लावस्थितलीलाशुकपञ्जर इव, पूर्वाचलशिखरविश्रान्तकिन्नरमिथुन-रक्तवस्त्रकञ्चुकितवीणालाबुरिव, गरुड इव हरिणाधिष्ठितः, राम इव लक्ष्मणान्वितः,

वानरेन्द्र इव अनुरक्तताारः, वृषभ इव रोहिणीप्रियः, सुराजेव रक्तमण्डलः, जाम्बवानिव ऋक्षपरिवृतो रजनीपतिरुदयमाससाद ।

ततः कामिनीहृदयसङ्क्रामित इव, चक्राङ्गनानयनयुगलपीत इव रक्तकुमुदकोशालीढ इव क्षीणतां जगाम क्षणदाकरगतो रागः ।

अनन्तरं शर्वरीव्रजाङ्गनाविष्कृतनूतननवनीतस्वस्तिक इव, कुसुमकेतोर्मुखच्छायामुद्रित इव मुकुरः, श्वेतातपत्रमिव मकरकेतोः, दन्तपालिचक्रमिव वियन्महाखङ्गस्य, श्वेतचामरमिव मदनमहाराजस्य, बालपुलिनमिव निशायमुनायाः, स्फाटिकलिङ्गमिव गगनमहातापसस्य, अण्डमिव कालोरगस्य, कम्बुरिव नभोमहार्णवस्य, स्फाटिककमण्डलुरिव नभोव्रतिनः, चैत्यमिव मदनारिदग्धस्य मकरकेतोः, चिताचक्रमिव कलङ्ककालाङ्गारशबलं सङ्कल्पजन्मनः, पुण्डरीकमिव गगनगामिगङ्गायाः, फेनपुञ्ज इव गगनमहार्णवस्य, पारदपिण्ड इव कालधातुवादिनः, राजतकलश इव दूर्वाप्रवालशबलो मनोभवाभिषेकस्य, श्वेतचक्रमिव कन्दर्परथस्य, चूडामणिरिव उदयगिरिनागराजस्य, श्वेतपारावत इव अम्बरमहाप्रासादस्य, गगनसरिद्धौतसिन्दूरं कुम्भस्थलमिवैरावतस्य, भुग्नशृङ्गपुराणगोमुण्डखण्ड इव ताराश्वेतगोधूमशालिनो नभःक्षेत्रस्य,

मलयजपिण्डपाण्डुरराजततालवृन्तमिव सिद्धाङ्गनाहस्तविस्रस्तम्, क्षीणरागो भगवानुडुपतिरुज्जगाम।

यश्च पुण्डरीकं लोकलोचनमधुकराणाम्, शयनीयसैकतं चित्तराजहंसानाम्, स्फाटिकव्यजनं विरहवह्नीनाम्, श्वेतशाणचक्रं मन्मथसायकानाम्। अत्रान्तरे अभिसारिकासार्थप्रेषितानां प्रियतमान् प्रति दूतीनां द्व्यर्थाः सप्रपञ्चाः विकारभङ्गुराः संवादा बभूवुः। अवस्त्रीकृतमात्मानं नाकलयसि तत्त्वतः कान्त! प्रस्तर इव क्रूरोऽसि, न चाकर्षकचुम्बकद्रावकेष्वेकोऽसि, भ्रामकोऽसि परं कितव।

धर्मार्थमन्यप्रयुक्तः क्षेपणिक इव मुधावाहिततरवारिस्त्वमसि। सखेदमिव तां मनसा चिन्तयसि दुर्लभाम्।

सत्त्वसारचित्तो यो रिपुमण्डलाग्रतो निर्वृतिमुपेत्य तिष्ठति। स खलु वीरः प्रतिपक्षस्य यः सम्प्रहारतः कुञ्जरान्नयति।

धृतोरुकरवालसञ्चयोऽपि परमकाण्ड एवं सम्पतन्महापदं विग्रहेण लभते।।

राजसेन राजसे नरहितो रहितो ध्रुवम्। विशारदा शारदाभुविशदा विशदात्मनां नमहिमानमहिमानरक्षणक्षमा क्षमातिलक धीरता मनसि भूतता भूतता च वचसि ।।

साहसेन सा हसेन कमला कमलालया यया जिता, सा त्वदर्पणा दर्पणाकारविमलाशया शयाब्जनिर्जितकिसलया सलयाङ्गुलिरिव विभ्रमेण विभ्रमेण गवाक्षशलाकाविवरं लोकयन्ती लोकयन्त्रितविनाशा विना शापमनुभवति दुःखानि।

जीवनायक जीवनाय कमिव नाश्रयति सुभगम्।

अन्यास्तावदासतामहमेव दासतां पुरतो भजामि, मैत्र्यतो मैत्र्यतोऽस्तु।

अञ्जसारतः सारतः किमपि कन्दर्पकं दर्पकं न चेत्तनोषि, विशेषतोऽविशेषतः स्थिरमेव मरणम्। शठधियां शोधन यशोधन प्रेमहार्यामहार्या समासोत्कटाक्षैः कटाक्षैराविर्भूतदास्यास्तदास्याः पारेजनाः।

कमलाकृतिनारीणां कमलाकृति नारीणां भवतां मुखं च मलिनितम् ।

विश्वस्य विश्वस्य व्यवस्थां समासाद्य समासाद्यानेककालं सङ्गीतसङ्गी तनुषे तनुषे कमनङ्गस्य पुष्पेषु रुजा तरसा जातरसा मन्दाक्षमन्दा क्षणं भ्रमन्ती मुह्यति।

कामधुराधरेण का मधुराधरेण युक्ता रजोराजविशेषकेण विशेषकेण मुखेन्दुना तव हृदि लग्ना म्रदिमाकरेण करेण स्वेदबिन्दुपयोधरेण पयोधरेण वक्षःफलकाञ्चनेन जितानाविलकाञ्चनेन!

कामदारुणमदारुणनेत्रा स्मरमयं रमयन्तं भवन्तमदयं मदयन्ती परमकमितारं परमकमितारं वाञ्छति हारिणा हारिणा स्तनकुम्भेन हारिणाक्षिरुचिहारिणा चक्षुषा च ।

अनन्तरं दुग्धार्णवनिमग्नमिव, स्फाटिकगृहप्रविष्टमिव, श्वेतद्वीपनिविष्टमिव जगदामुमुदे ।

ततः क्रमेण च विघटमानदलपुटकुमुदकाननकोशमकरन्द-बिन्दुसन्दोहसान्द्रनिष्यन्दास्वादमुदितमधुकरकुलकलरुतमुखरितदिगन्ते चन्द्रिकापानभरा-लसचकोरकामिनीभिरभिनन्दितागमने सुरतभरपरिश्रमखिन्नपुलिन्दराजसुन्दरी-स्वेदजलकणिकापहारिणि प्रवाति सायन्तने तनीयसि निशानिश्वासनिभे नभस्वति कन्दर्पकेतुस्तुमालिकामकरन्दसहायो वासवदत्तानगरमयासीत्।

अथ स प्रविश्य कटकैकदेशे विनिर्मितम्, अभ्रंलिहशिखरेण, सुधाधवलेन, एकान्तरनिविष्टकनकमुक्तामरकतपद्मरागच्छलेन, वासवदत्तादर्शनार्थमवस्थितदेवतागणेनेव सालवलयेन परिगतम्, अनिलोल्लासिताभिर्नभस्तरुकुसुममञ्जरीभिरिव तर्जयन्तीभिरिव गगनपुरश्रियं पताकाभिरुपशोभमानम्, कनकशिलापट्टाङ्गणप्रसृताभिः कर्पूरकुङ्कुम-चन्दनैलालवङ्गपरिमलवाहिनीभिः तटनिकटस्फाटिकशिलापट्टसुखनिष-ण्णनिद्रायमाणाज्ञानश्वेतपारावताभिः, प्रभ्रश्यत्तटविटपिकुसुमस्तबकितसलिलाभिः,

अनवरतमज्जदुन्मज्जद्युवतिजनघनजघनास्फालनोच्छवसितशीकरनिकरस्नपिततीरवेदिकाभिः, कर्पूरपूरविरचितपुलिनतलनिषण्णनिनदानुमीयमानराजहंसाभिः, विकचनीलोत्पलकाननदर्शिताकाण्डचक्रवाकतिमिरशङ्काभिः, युवतीभिरिव सुपयोधराभिः, सुग्रीवयुद्धप्रवृत्तिभिरिव कीलालस्नपितकुम्भकर्णाभिः, सागरकूलभूमिभिरिव सुन्दरीपादपरागशबलाभिः, नवनृपतिचित्तवृत्तिभिरिव कुल्यापमानकारिणीभिः, अनेकाभिर्नदीभिरुपशोभितम्, शिखरगतमुक्ताजालव्याजेन पुरयुवतिदर्शनकुतूहलागतं तारागणमिवोद्वहद्भिः, उपान्तनिलीनाभिः काचकलशाकृतिमुद्वहन्तीभिः शिखण्डिसंहतिभिरुद्भासितैः प्रासादैरुपशोभमानम्, क्वचिदनवरतदह्यमानकृष्णागुरुधूमपटलैर्दर्शिताकालजलदसन्नाहम्, क्वचिद्गम्भीरमुरजरवाहूतसमदनीलकण्ठम्, सायन्तनसमयमिव पतितलोकलोचनम्, जनकयज्ञस्थानमिव दारोत्सुकरामम्, मानुष्यकमिवाभिनन्दितसुरतम्, अरण्यमिवानेकसालशोभितम्, निधानमिव कौतुकस्य, आस्थानमिव शृङ्गारस्य, कुलगृहमिव सकलविभ्रमाणाम्, सङ्केतस्थानमिव सौन्दर्यस्य, वासवदत्ताभवनं भवनन्दनप्रभावो ददर्श।

भद्रे द्रवसि द्रवसिद्धेरगदिता। चपला च पलायते किमेषा। स्तबकस्तव कर्णतः पतितोऽयम्। सुरेखे सुकपोलरेखे सुरया सुरयाचिताश्रीस्त्वमसि। मत्ते कलहे!

कलहेमकाञ्चीदामक्वणितैः स्मरमिवाह्वयसि। मलये मलयेप्सितं कुरु दृशैवाधिगतासि। कलिके! कलिकेतुमिमां मुखरां मुञ्च मेखलाम्; शृणुमः कलवल्लकीविरुतम्। मेखला मेखला न भवति, त्वमेव मुखतया खरतया च त्रपतेऽत्र पतेयमिति नागकुसुमोपहारेषु स्खलन्तीयम् । तव कैतवकैरलम्, कलितो निःश्वासैर्वेपथुरेवाशयं व्यनक्ति। वहतीव हतीरनङ्गलेखे तव वपुरलसं स्मरसायकानाम्। तव च हारलता पिहिताऽपि हि तायते। उत्कलिके तवोत्कलिकाबहुले वदने वद नेत्रपयोजकान्ते किमुपमानमिन्दुरप्यायाति। वसतीव सतीव्रते! तव हृदि कोऽपि । शतधा शतधारसारा वाचस्तवान्भूताः। कुन्तलिके! करकाकरकालमेघखण्डतुलामयमुपयात्युल्लसितोत्फुल्लमल्लिकामालभारी तव कुन्तलकलापः। केरलिके पुरगोपुरगोचराः श्रूयन्ते सङ्गीतध्वनयः किमिव कल्पयति। क्षणमीक्षणमीलनादपि चटुलं चटुलम्पटं सखीजनमायासयसि। सुरते सुरते स्तनताऽनेषु यत्सौख्यं लब्धं तत्स्मरता स्मरतापनोदनं दयितेन दयितेन विमुक्तासि। किं मुह्यसि महतो महतो दयितः स्मरति स्म रतिप्रियं तव कौशलम्। नवनिशानखराणां नखराणां स्मरजन्यां स्म रजन्यां कुरुते कुरुतेन रुजम्। तव लोचनाभ्यां लोचनाभ्यां प्रीणिताखिलजनेक्षणदेशः क्षणदेशः किं न पीयते। प्रियसखि! मदनमालिनि! बिम्बाधरसङ्गत्या सङ्गत्यागेच्छया विरागं कुरु मधुमदारुणमालवीकपोलतलसमानो

लसमानो रक्तमण्डलतया लतया त्वया को विशेषः? कुरङ्गिके! कल्पय कुरङ्गाशावकेभ्यः शष्पाङ्कुरम्। किशोरिके! कारय किशोरप्रत्यवेक्षाम्। तरलिके! तरलय कृष्णागुरुधूपपटलम्। कर्पूरिके! पाण्डरय कर्पूरधूलिभिः पयोधरभारम्। मातङ्गिके मानय मातङ्गशिशुयाचनाम्। शशिलेखे! विलिख ललाटपट्टे शशिलेखाम्। केतकिके! सङ्केतय केतकीमण्डपदोहृदम्। शकुनिके! देहि क्रीडाशकुनिभ्य आहाराम्। मदनमञ्जरि! मञ्जीरय लतामण्डपम्। शृङ्गारमञ्जरि! कल्पय शृङ्गाररचनाम्। सञ्जीवनिके! वितर जीवञ्जीवकमिथुनाय मरिचपल्लवम्। पल्लविके! पल्लवय कर्पूरधूलिभिः कृत्रिमकेतकीकाननम्। सहकारमञ्जरि! सम्मार्जय श्रमोदकबिन्दून् सहकारसौरभ-व्यजनवातेन। मदनलेखे! विलिख मदनलेखं मलयानिलस्य, मकरिके! मकराङ्कशोभिते! देहि मृणालाङ्कुरं राजहंसशावेभ्यः। विलासवति! विलासय मयूरकिशोरकम्। तमालिके! लेपय मलयजरसेन भवनवाटम्। काञ्चनिके! विकिर कस्तूरिकाद्रवं काञ्चनमण्डपिकायाम्। प्रवालिके! सेचय घुसृणरसेन बालप्रवालकाननम् इत्यन्योऽन्यं प्रणयपेशलाः प्रमदानामालापकथाः शृण्वन् कन्दर्पकेतुमिकरन्देन सह तद्भवनं प्राविशत्।

अकरोच्च मनसि--अहो भुवनातिशायि सौन्दर्यम्। अहो शृङ्गारकलाकौशलम्। तथा ह्ययं तत्काललीलाबहलविरलविमलमालवीदशनकान्तिदन्तिदन्तघटितो मण्डपोऽसावपि

कनकशलाकाविनिर्मितयन्त्रपञ्जरसंयतः क्रीडाशुकः इत्यादि परिचिन्तयन्, प्रविश्य, व्याकरणेनेव सरक्तपादेन महाभारतेनेव सुपर्वणा रामायणेनेव सुन्दरकाण्डचारुणाजङ्घायुगलेन विराजमानाम्, छन्दोविचितिमिव भ्राजमानतनुमध्याम्, नक्षत्रविद्यामिव गणनीयहस्तश्रवणाम्, न्यायस्थितिमिवोद्यतकरस्वरूपाम्, बौद्धसङ्गतिमिवालङ्कारभूषिताम्, उपनिषदमिवानन्दमेकमुद्योतयन्तीम्, द्विजकुलस्थितिमिव चारुचरणाम्, विन्ध्यगिरिश्रियमिव सुनितम्बाम्, तारामिव गुरुकलत्रतयोपशोभिताम्, शतकोटियष्टिमिव मुष्टिग्राह्यमध्याम्, प्रियङ्गुश्यामासखीमिव प्रियदर्शनाम्, ब्रह्मदत्तमहिषीमिव सोमप्रभाम्, दिग्गजकरेणुकामिवानुपमाम्, रेवामिव नर्मदाम्, वेलामिव तमालपत्रप्रसाधिताम्, अश्वतरकन्यामिव मदालसां वासवदत्तां ददर्श ।

अथ तां प्रीतिविस्फारितेन चक्षुषा पिबतः कन्दर्पकेतोर्जहार चेतनां मूर्च्छा ।तमपि पश्यन्ती वासवदत्ता मुमूर्च्छ। अथ मकरन्दसखीजनप्रयत्नाल्लब्धसंज्ञावेतावेकासनमलञ्चक्रतुः। अथ वासवदत्तायाः प्राणेभ्योऽपि गरीयसी सर्वविस्रम्भपात्रं कलावती नाम सखी कन्दर्पकेतुमुवाच। 'आर्यपुत्र ! नायं विस्रम्भकथानामवसरः। अतो लघुतरमेवाभिधीयते। त्वत्कृते याऽनया वेदनाऽनुभूता, सा, यदि नभः पत्रायते, सागरो मेलानन्दायते, ब्रह्मा लिपिकरायते, भुजगपतिर्वा कथकायते

तदा किमपि कथमप्यनेकैर्युगसहस्रैरभिलिख्यते कथ्यते वा । त्वयाऽपि राज्यमुज्झितम् । किं बहुना-आत्मा सङ्कटे समारोपित एव। एषाऽस्मत्स्वामिदुहिता प्रभातायां शर्वर्य्यां यौवनातिक्रमदोषशङ्किना पित्रा हठेन विद्याधरचक्रवर्तिनो विजयकेतोः पुत्राय पुष्पकेतवे पागिग्रहणेन दातव्येति निश्चिता। अनया चार्ययाऽस्माभिः सह सम्मन्त्र्यालोचितम्- अद्य यदि तं जनमादाय नागच्छति तमालिका तदावश्यमेवाश्रयाश आश्रयितव्य इति। सुकृतवशाच्च महाभागः समागतः। तदत्र यत् साम्प्रतं तत्र भवानेव प्रमाणम् । इत्युक्त्वा विरराम ।

अथ कन्दर्पकेतुर्भीतभीत इव, प्रणयानन्दामृतसागरलहरीभिराप्लुत इव, भुवनत्रयराज्याभिषिक्त इव, वासवदत्तया सह सम्मन्त्र्य, मकरन्दं वार्तान्वेषणाय तत्रैव नगरे नियुज्य, भुजङ्गेनेव सदागत्यभिमुखेन सरित्पतिनेव शुक्तिशोभितेन, विन्ध्यविपिनेनेव श्रीवृक्षलाञ्छितेन, हंसेनेव मानसगतिना, अरण्येनेव गण्डशोभितेन, वनस्पतिनेव स्कन्धशोभितेन, वज्रेणेवेन्द्रायुधेन, मनोजवनाम्ना तुरगेण तया सह नगरान्निर्जगाम ।

ततः क्रमेण गव्यूतिमात्रमध्वानं गत्वा, नरजाङ्गलकवलनाभिलाष-मिलितनिःशङ्ककङ्ककुलसङ्कुलेन अर्धदग्धचिताचक्रसिमसिमायमानवसाविस्र-

विकटकटतृष्णाचटुलकटपूतनोत्तालवेतालरवभीषणेन, शूलशिखरारोपितशङ्कितवर्ण-कर्णनासिकच्छेदरुधिरपटलपतितझाङ्कारिकरकोटिकर्पूरकरालकौणपनृत्ततुमुलेन भम्भरालीकेलिसम्भारभरितभूमिभागबीभत्सेन, कटाग्निदह्यमानपटुचटचटन्नृ-करोटिटङ्कारभैरवरवेण, विवृतोल्कामुखीमुखज्वलज्ज्वलनज्वालाजटिलेन आन्त्रतन्तु-प्रोतकपालकलितकुचप्रालम्बडामरडाकिनीगणकृतकुणपविभागकोलाहलेन, आर्द्र-सिरारचितविवाहमङ्गलप्रतिसरपिशाचमिथुनप्रदक्षिणीक्रियमाणचितानलेन, शूलपाणिनेव कपालावलिशिवाबहुभूतिभुजगराजावरुद्धदेहेन, पुरुषातिशयेनेव अनेक-मण्डलकृतसेवेन, दण्डकारण्येनेव कबन्धाधिष्ठितेन, चक्रवर्तिनेव अनेकनरेन्द्रपरिवृतेन, श्मशानवाटेन निर्गत्य, निमेषमात्रादेवानेकशतयोजनमध्वानं गत्वा पुनरपि, प्रलयकालवेलामिव समुदितार्कसमूहाम्, नागराज्यस्थितिमिव अनन्तमूलाम्, सुधर्मामिव स्वच्छन्दस्थितकौशिकाम्, सत्पुरुषसेवामिव बहुश्रीफलाढ्याम्, भारतसमरभूमिमिव दूरप्ररूढार्जुनाम्, पुलोमकुलस्थितिमिव सहस्रनेत्रोचितेन्द्राणीम् शूलपालचित्तवृत्तिमिव फलितगणिकारिकाम्, सज्जनसम्पदमिव विकसिताशोकसरलपुन्नागाम्, शिशुजनलीलामिव कृतधात्रीधृतिम् क्वचिद्राघवचित्तवृत्तिमिव वैदेहीमयीम्, क्वचित्क्षीरसमुद्रमथनवेलामिव उज्जृम्भमाणामृताम्, क्वचिन्नारायणशक्तिमिव स्वच्छन्दापराजिताम्,

क्वचिद्वाल्मीकिसरस्वतीमिव दर्शितेक्ष्वाकुवंशाम् क्वचिल्लङ्कामिव बहुपलाशसेविताम्, क्वचित्कुरुसेनामिव अर्जुनशरनिकरपरिवारिताम्, क्वचिन्नारायणमूर्तिमिव बहुरूपाम्, सुग्रीवसेनामिव पनसचन्दनकुमुदनलसेविताम्, क्वचिदविधवामिव सिन्दूरतिलकभूषिताम् प्रवालाभरणाञ्च, क्वचित्कुरुसेनामिव उलूकद्रोणशकुनिसनाथाम् धार्तराष्ट्रान्वितां च, अम्लानजातिभूषितामपि विरुद्धवंशाम्, दर्शिताभयामपि विभीषणाम्, सततहितपथ्यामपि प्रवृद्धगुल्माम्, षट्पदव्याकुलामपि द्विपदानाकुलाम्, द्विजकलभूषितामप्यकुलीनवंशाम्, विन्ध्याटवीं प्रविवेश । अनन्तरं तयोर्निद्रामादाय जगाम रजनी ।

ततः क्रमेण कालकैवर्तेन तमिस्रानायं प्रक्षिप्य गगनमहासरसि सजीवशफरनिकर इवापह्रियमाणे तारागणे, सन्ध्यारक्तांशुके विषमप्ररूढबिसलताशरयन्त्रानुगतशतपत्रपुस्तकसनाथे, मकरन्दबिन्दुसन्दोहनिर्भरपानमत्तमधुकरसान्द्रमञ्जुस्वनैः स्वधर्ममिव पठति विकचकमलाकरभिक्षौ, कृषीवलेनेव कालेन तिमिरबीजनिकरेष्विव मधुकरेषु मधुरसकर्दमितपरागपङ्केषु घनघट्टमानदलपुटेषु कुमुदाकरक्षेत्रेषूप्यमानेषु, रजोमुर्मुरचूर्णसनाथमधुकरपटलधूमानुगतोद्दण्डपुण्डरीकव्याजाद् धूपमिव भगवते किरणमालिने प्रयच्छन्त्यां कमलिनीतापस्याम्, रजनीवधूकरद्वयोच्छलितपतत्प्रभातमुसलाहतिक्षतान्तरे उलूखल इव चन्द्रमण्डले कण्डनविकीर्णेषु तण्डुलेष्विव तारागणेषु

उन्मीलत्सु, सन्ध्याताम्रमुखेन वासरवानरेण नभस्तरुमारोहता शाखाभ्य इव कम्पिताभ्यो दिग्भ्यो विकचप्रसूननिकर इव तारागणे फल इवेन्दुमण्डले च पतति तारागणशालितण्डुलशबलनभोऽङ्गणं स्फुरदरुणकिरणचूडाचक्रचारुवदने वासरकृकवाकौ चरितुमवतरति, मत्सङ्गमादतिप्रवृद्धो वारुणीसङ्गमाद् द्विजपतिरेष पततीति हसन्त्यामिवाखण्डलाशायाम्, अरुणकेसरिकराघातनिहतान्धकारकरीन्द्ररुधिरधाराभिरिव उदयगिरिशिखरनिर्झरधौतधातुधाराभिरिव, त्वङ्गत्तुरङ्गखरखुरपाटितपद्मरागच्छटाभिरिव, उदयाचलकूटकोटिप्ररूढजपाकुसुमकान्तिभिरिव पूर्वगिरिकेसरिकरतलाहतमत्तमातङ्गोत्त-माङ्गविगलदसृग्धाराप्रसारिणीभिरिव त्रिभुवनकार्यसम्पादनानुरागरसैरिव रक्तमण्डले, ताराकुमुदवनग्रहणाय प्रसारितहस्त इव कुङ्कुमारुणैः किरणैः कनकदर्पण इव प्राचीविलासिन्याः, पूर्वाचलभोगीन्द्रफणमणौ गगनेन्द्रनीलतरुकनककिसलये, नभोनगरप्राग्द्वारकनकपूर्णकुम्भे तप्तलोहकुम्भाकारे, प्राचीकुमारीललाटतटघटित-कुङ्कुमतिलकबिन्दौ, सन्ध्यावाललतैककुसुमे, मञ्जिष्ठारक्तपट्टसूत्रपिण्डसदृशे, सन्ध्यारुणसूत्रग्रथितप्राचीवधूकाञ्चीकाञ्चनदीनारचक्र इव, वासरविद्याधरसिद्धगुलिक इव, कुमार इव संहृततारके, पद्मनाभ इवोल्लसितपद्मे, अध्वग इव छायाप्रिये, शक्र इव गोपतौ, उदयगिरिधातुरागारुणदिग्गजपादतलानुकारिणि विभावरीतिमिरतस्करे भगवति भास्करे

उदयमारोहति, माञ्जिष्ठचामर इव दिग्गजेषु, महाभारतसमरभूमिरुधिरोद्गार इव कुरुक्षेत्रेषु सुरधनुःकान्तिविलेप इव जलदच्छेदेषु काषायपट इव शाक्याश्रमशाखिशाखासु, कौसुम्भराग इव ध्वजपटपल्लवेषु, फलपाक इव कर्कन्धूषु, कुङ्कुमरस इव व्योममहासौधाङ्गणे, सञ्चरदरुणयवनिकापट इव कालनर्तकस्य, बालप्रवालभङ्गारुणे प्रसरति बालातपे, क्षणेन च चाटुचटुलचक्रवाकहृदयशोकसन्तापहरणादिव दहनसमर्पिततेजःप्रवेशादिव दिननाथकान्तोपलसङ्गादिव उष्णिमानमुष्णरश्मेराश्रयति रश्मिसञ्चये, कन्दर्पकेतुः सर्वरात्रजागरणपरवशाहारशून्यशरीरतया निश्चेतनोऽनेकयोजनशताध्वभ्रमणखिन्नो वासवदत्तयाप्येवंविधया सह लतागृहे मन्दमारुतान्दोलितकुसुमपरिमललुब्धमुग्धपरिभ्रमद्भ्रमरझङ्कारमनोहरे तत्कालागतया निद्रया गृहीतो निस्पन्दकरणग्रामः सुष्वाप।

ततो वणिजीव प्रसारिताम्बरे, महादावानल इव सकलकाष्ठोद्दीपिनि, कल्पवृक्ष इव सर्वाशाप्रसाधके, पतङ्गमण्डले मध्यं नभःस्थलमारूढे, कन्दर्पकेतुः प्रबुद्धः, प्रियया विनाकृतं लतागृहमवलोक्य उत्थाय च तत इतो दत्तदृष्टिः, क्षणं विटपिषु, क्षणं लतान्तरेषु, क्षणमधः कूपेषु, क्षणमूर्ध्वं तरुशिखरेषु, क्षणं शुष्कपर्णराशिषु, क्षणमाकाशतले, क्षणं दिक्षु, क्षणं विदिक्षु, च भ्रमन्नवरतविरहानलदह्यमानहृदयो विललाप। हा प्रिये! वासवदत्ते देहि मे

दर्शनम्। कृतं परिहासेन। अन्तर्हिताऽसि। त्वत्कृते यानि दुःखान्यनुभूतानि तेषां त्वमेव प्रमाणम्। हा प्रियसखे मकरन्द! पश्य मे दैवदुर्विलसितम्। किं पूर्वं मया कृतमनवदातं कर्म। अहो दुर्विपाका नियतिः। अहो दुरतिक्रमा कालगतिः। अहो ग्रहाणामतिकटुकटाक्षपातनम्। अहो विसदृशफलता गुरुजनाशिषाम्। अहो दुःस्वप्नानां दुर्निमित्तानाञ्च फलम्। सर्वथा न किञ्चिदगोचरो भवितव्यतानाम्। किं न सम्यगागमिता विद्याः। किं यथावदनाराधिता गुरवः। किं नोपासिता वह्नयः। किं नामाधिक्षिप्ता भूदेवाः। किं न प्रदक्षिणीकृताः सुरभयः। किं न कृतं शरणागतेष्वभयम्' इति बहुविधं विलपन्, मरणेच्छुर्दक्षिणेन काननं निर्गत्य, नव्यनडनलदनलिनीनिचुल-पिचुलवञ्जुलसरलविदलवकुलचिरबिल्वबिल्वबहुलेन, प्रचुरविरचितविविधोट-जकुटजरुद्धोपकण्ठेन, सोत्कण्ठभृङ्गराजरसितसुन्दरसुन्दरीवनेन, विततवेत्रव्रतति-व्रातावरणतरुणवरुणस्कन्धसन्नद्धभृङ्गरोलेन, गोलाङ्गूलभग्नमधुपटलरसासारशीकरसिक्त-तरुतलेन, प्रवृद्धनारिकेलकङ्केलिराजतालीतालतमालहिन्तालपूगपुन्नागकेसरनाग-केसरवनेन, घनसारमल्लिकाकेतकीकोविदारमन्दारजम्बूबीजपूरजम्बीरगुल्मगहनेन, पवनसंवाहितानेकपनसविटपिविटपेन, अप्रत्यूहदात्यूहकुहरितभरितनदीतटनिकुञ्जपुञ्जेन, पुञ्जिताकुण्ठकण्ठकलकण्ठाध्यासितसहकारपल्लवेन, चपलकुलायकुक्कुट-

कुटुम्बाध्युषितोत्कटानेकविटपेन, कोरकनिकुरम्बरोमाञ्चितकुरबकराजिना, रक्ताशोकपल्लवलावण्यविलिप्यमानदशदिशा, प्रविकसितकेसरकुसुमकेसररजो-विसरधूसरितपरिसरेण, परागपुञ्जपिञ्जर-सिन्दुवारमञ्जरीरज्यमानमधुकरमञ्जु-शिञ्जितजनितजनमुदा, लवङ्गचम्पकमधूकतमाललोध्रकर्णिकारकदम्बकेन, मदजल-मेचकितगण्डकाषमुचुकुन्दकाण्डकथ्यमाननिःशङ्ककरिकरटविकटकण्डूतिना, कतिपयदिवसप्रसूतकुक्कुटीकुटीकृतकुटजकोटरेण, चटकसञ्चार्यमाणचटुल-वाचाटचाटकैरक्रियमाणचाटुना, सहचरीसहचरणचञ्चुरचकोरचुञ्चुना, शैलेयसुगन्धितशिलातलसुखशयितशशशिशुराशिना, शेफालिकाशिफाविवरवि-स्रब्धविवर्तमानगौधेरराशिना, निरातङ्करङ्कुनिकरेण, निराकुलनकुलकुलकेलिना, कलकोकिलकुलकवलितसहकारकलिकोद्गमेन, सहकारारामरोमन्थायमानचमरीयूथेन, श्रवणहारिसनीडगिरिनितम्बनिर्झरनिनादश्रवणनिद्रानन्दमन्दायमानकरिकुल-कर्णतालदुन्दुभिध्वनिना, समासन्नकिन्नरीगीतश्रवणरममाणरुरुविसरेण, कुहरितहरिद्राद्रवरज्यमानवराहपोतपोत्रपालिना, गुञ्जाकुञ्जपुञ्जितजाहकजातेन, दंशदशनकुपितकपिपोतपेटकनखकोटिपाटितपाटलीपुटकीटसङ्कटेन, कुलिशशिखरखर-नखरप्रचयप्रचण्डचपेटापाटितमत्तमातङ्गकुम्भस्थलरुधिरच्छटाच्छुरितचारुकेसरभार-

भासुरकेसरिकदम्बेन, महासागरकच्छोपान्तेन कतिपयदूरमध्वानं गत्वा, अतिचपलवीचिप्रचयप्रहतप्रपाततया, ताण्डवोद्दण्डदोर्दण्डषण्डखण्डपरशुविडम्बनापण्डितम्, वारुणविजयपताकाभिरिव, शेषकुलनिर्मोकमञ्जुमञ्जरीभिरिव, सुधासहचरीभिरिव, ज्योत्स्नासहोदरीभिरिव, शशाङ्कमण्डलपरिशेषपरमाणुसन्ततिभिरिव, लक्ष्मीलीला-तर्पणधाराभिरिव, जलदेवताचन्दनविच्छित्तिभिरिव, फेनराजिभिरुपान्तरमणीयम्, अपरमिव गगनतलमवनितलमवतीर्णम्, अच्छजलादुच्छलच्छीकरनिकरेण नभश्चरान् मुक्ताफलैरिव विलोभयन्तम्, अभयाभ्यर्थनागतानेकसपक्षक्षितिधरभरितकुक्षिभागम्, सगरसुतविसरसमुत्खातम्, वडवामुखगतवारिजातम्, सुरपत्युपात्तपारिजातम्, अभिजातमणिरत्नाकरम्, करिमकरकुलसङ्कुलम्, शकुलकुलकवलनाभिलाष-सञ्चरन्नक्रचक्रम्, स्तिमिततिमितिमिङ्गिलकुलम्, कदलीवनपालीपालितैलाल-वलीलवङ्गमातुलुङ्गगुल्मगहनम्, ऊर्मिमारुतमर्मरिततरलतरोत्तालतालीदलचकित-जलमानुषमिथुनमृदितनिलीनतलिनशैवालम्, प्रवालाङ्कुरकोटिपाटितमुख-स्विन्नशङ्खनखखरशिखाविलिखिततटलेखम्, खगेश्वरगोत्रपत्ररथपटलकलिलसलिलम्, अद्याप्यनिर्मुक्तमन्दरमथनसंस्कारमिवावर्तभ्रान्तिभिः, सापस्मारमिव सितफेनसञ्चयैः, ससुरामोदमिव बेलावकुलपरिमलैः, सरोषमिव गर्जितैः, सखेदमिव नागनिःश्वासैः,

सभ्रूभङ्गमिव तरङ्गैः, सालानस्तम्भमिव रामसेतुना, कुम्भीनसीकुक्षिमिव लवणोत्पत्तिस्थानम्, व्याकरणमिव विततस्त्रीनदीकृत्यबहुलम्, राजकुलमिव दृश्यमानमहापात्रम्, हस्तिबन्धमिव वारिगतानेकनागमुच्यमानशूत्कारम्, विश्वामित्रपुत्रवर्गमिव अम्भोजचामरमत्स्योपशोभितम्, सत्पुरुषमिव गोत्राश्रयम्, साधुमिवाच्युतस्थितिरमणीयम्, सुनृपमिव सज्जनक्रमकरम्, कृतमन्युमिव करतोयाप्लुतमुखम्, विरहिणमिव चन्दनोदकसिक्तम्, विलासिनमिव नर्मदानुगतम् राशिमिव समीनकुलीरम्, शृङ्गारिणमिव अनेकमुक्तालङ्कृतम्, उद्धृतकालकूटमपि प्रकटितविषराशिम्, अतिवृद्धमपि सुन्दरीपरिवृतकण्ठम्, सुरोत्पत्तिस्थानमपि असुराधिष्ठितम्, जलनिधिमपश्यत् ।

अचिन्तयच्च-अहो मे कृतापकारेणापि विधिनोपकृतिरेव कृता; यदयं लोचनगोचरतां नीतः समुद्रः। तदत्र देहमुत्सृज्य प्रियाविरहाग्निं निर्वापयामि। यद्यप्यनातुरस्य देहत्यागो न विहितस्तथापि कार्यः। न खलु सर्वः सर्वं कार्यमेव करोति। असारे संसारे केन किं नाम न कृतम्। तथाहि- गुरुदारहरणं द्विजराजोऽकरोत्। पुरुरवा ब्राह्मणधनतृष्णया विननाश। नहुषः परकलत्रदोहदी भुजङ्गतामयासीत्। ययातिर्विहितब्राह्मणीपाणिग्रहणः पपात। सुद्युम्नः स्त्रीमय एवाभवत्। सोमकस्य प्रख्याता

जगति जन्तुवधनिर्घृणता। पुरुकुत्सः कुत्सित एवाभवत्। कुवलयाश्वोऽश्वतरकन्यामपि जगाम। नृगःकृकलासतामगमत्। नलः कलिनाऽभिभूतः। संवरणो मित्रदुहितरि विक्लवतामगात्। दशरथोऽपीष्टरामोन्मादेन मृत्युमवाप। कार्तवीर्यो गोब्राह्मणपीडया पञ्चत्वमयासीत्। शन्तनुरतिव्यसनाद्विललाप। युधिष्ठिरः समरशिरसि सत्यमुत्ससर्ज। तदित्थं नास्त्येव जगत्यकलङ्कः कोऽपि। तदहमपि देहमुत्सृजामि। इति विचिन्त्य कुररखरनखरशिखरखण्डितपृथुलपृथुरोमशल्कसङ्कुलम्, सङ्कलितजलनकुलोच्चारशारम्, क्रोष्टुकुलोत्सृष्टविकटकर्कटककर्परपरम्परापरिगतप्रान्तम्, अतितरलजलरयलुलितचटुलशफरकुलकवलनकृतमतिनिभृतबकशकुनिनिवहधवलितपरिसरम्, अतिचपलजलकपिकुलविहरणललितसलिलकणनिकरपरिमिलनशिशिरिततमालतलम्, अनुदिननिपतदतितरुणवनमहिषगवलशिखरविलिखितविषमतटम्, अनवरतचरदसितमुखचरणविहगनिवहमधुरनिनदमुखरितम्, अहिमकरकरनिकररुचिरजलमनुजगणशयनमृदिततटधरणीतलम्, अतिबहलमदजलशबलकरटतटकरिशतनिपतितमधुकरनिकरविरुतिरतिकरम्, अतिजवनपवनविधुतजलधिजलविघटननिपतितमणिगणपरिगतपरिसरम्, जलनिधिजलगतभुजगनिर्मुक्तनिर्मोकपट्टम्, दर्पणमिव वसुन्धरायाः, स्फटिककुट्टिममिव वरुणस्य,

कमलवनमिव सपद्मरागम्, वनप्रदेशमिव सविद्रुमलतम्, कातरमिव सदरम्, विष्णुमिवानेकमुक्तोपेतम्, पुलिनतलमाससाद ।

ततः कृतस्नानादिसकलकृत्यो जलनिधिजलमवतरितुमारेभे शरीरत्यागाय।

अथ सानुग्रहेषु ग्राहेषु, निर्मत्सरेषु मत्स्येषु, अनिच्छेषु कच्छपेषु, अक्रूरेषु नक्रेषु, अभयङ्करेषु मकरेषु, अमारेषु शिशुमारेषु, आकाशसरस्वती समुदचरत्--आर्य कन्दर्पकेतो ! पुनरपि तव प्रियया सङ्गतिर्भविष्यत्यचिरेण । तद्विरम मरणव्यवसायात् ।' इति । सोऽपि तदुपश्रुत्य मरणारम्भाद्विरराम । ततः प्रियासमागमाशया शरीरस्थितिहेतुमशनं चिकीर्षुः कच्छोपान्तवनं जगाम । अथ तत इतः परिभ्रमन्, फलमूलादिना वने वर्तयन्, कियन्तं कालं निनाय कन्दर्पकेतुः, ।

एकदा कतिपयमासापगमे काकलीगायन इव समृद्धनिम्नगानदः, सन्ध्यासमय इव नर्तितनीलकण्ठः, कुमारमयूर इव समारूढशरजन्मा, महातपस्वीव प्रशमितरजःप्रसरः, तापस इव धृतजलदकरकः, प्रलयकाल इव दर्शितानेकतरणिविभ्रमः, निरुपद्रवकाननोद्देश इव घनोत्सेकित सारङ्गः, रेवतीकरपल्लव इव हलिधृतिकरः, लङ्केश्वर इव समेघनादः, विन्ध्य इव घनश्यामः, युवतिजन इव पीनपयोधरः, समाजगाम वर्षासमयः । विभिन्नमेघनीलोत्पलकानननीले क्रीडासरसीव नभसि स्मरस्य कनकरत्ननौकेव,

जलदकाललक्ष्मीमातङ्गकन्यानर्तनरज्जुरिव, नभः सौधतोरणरत्नमालिकेव, प्रवसता निदाघेन दिवः पयोधरे स्मरणाय दत्ता नखपदावलिरिव, गगनलक्ष्मीबन्धुररशनामालेव, नभोमन्दारसुन्दरकलिकेव, रतिनखमार्जनरत्नशलाकेव, रत्नमयी विलासयष्टिरिव कुसुमकेतोरिन्द्रधनुर्लता रराज।

अतितृष्णावेगपीतजलनिधिजलशङ्खमालां बलाकाच्छलादुद्वमन्निवादृश्यत जलधरनिकरः। पीतहरितैः कृष्णकेदारिकाकोष्ठिकासु समुत्पतद्भिर्दर्दुर-शिशुकैर्जातुषैर्नयद्यूतैरिव चिक्रीड विद्युता समं घनकालः। रविदीपकज्जलितमेघनिकषोपले मेघसमयस्वर्णकारकर्षितस्वर्णरेखेव तडिदशोभत। विरहिणां हृदयं विदारयितुं कृतं करपत्रमिव कुसुमायुधस्य केतकीपुष्पमभासत। जलददारुणि लोलतडिल्लताकरपत्रदारिते पवनवेगनिर्धूताश्चूर्णनिकरा इव जलकणा बभुः। विच्छिन्नदिग्वधूहारमुक्तानिकरा इव खरपवनवेगभ्रमितघनघरट्टघट्टनसञ्चूर्णिततारानिकरा इव त्रिभुवनविजि-गीषोर्मकरध्वजस्य प्रस्थानलाजाञ्जलय इव करका व्यराजन्त। नवशाद्वलं सेन्द्रगोपं महीमहिलायाः शुकाङ्गश्यामलं लाक्षारसाङ्कितं स्तनोत्तरीयमिवालक्ष्यत।

मेघकुम्भसलिलैः पृथिवीनायिकां स्नपयित्वा प्रावृट्चेटिकायां गतायां स्वच्छमम्बरं दर्शयन्ती शरच्चेटिका समाजगाम।

अनन्तरमखञ्जखञ्जरीटे, अकुञ्चितक्रौञ्चसञ्चारे, निर्भरभरद्वाज-द्विजवाचाटविटपिविटपे, पटुतरप्रभप्रभाते, उद्भ्रान्तशुककुलकलकलसङ्कुलकलमकेदारे, प्रवेशितवेशराजहंसे, कंसारातिदेहद्युतिद्युतले, हंसतूलतुलितजरज्जलमुचि, सान्द्रीकृतेन्दुमहसि, गामुकजनमृदितमधुतृणवीरुधि, सरससारसरसितसारकासारे कशेरुकन्दलुब्धपोत्रिपोत्रोत्खातसरस्तटभागे, चकितचातके, सञ्चरन्मत्स्यपुत्रिकापत्रिपटलमधुरध्वनिविहितमुदि, कदर्थितकदम्बे, कम्बुद्विषि, प्रसृतबिसप्रसूते, विरलवारिदे, तारतरतारके, वारुणीतिलकचन्द्रमसि, स्वादुतरसलिले, स्फुरितशफरचक्रवलननिभृतबकानीके, मूकमण्डूकमण्डले, सङ्कोचितकञ्चुकिनि, काञ्चनच्छेदगौरगोधूमशालिशालिनि, उत्क्रोशदुत्क्रोशे, सुरभिसौगन्धिकगन्धहारिहरिणाश्वे, दरदलितकुमुदामोदिनि, कौमुदीकृतमुदि, निर्बर्हबर्हिणि, कूजत्कोयष्टिके, धृतधृति, धार्तराष्ट्रे, हृष्टकलमगोपिकागीताकर्णनसुखितमृगयूथे, कथीकृतयूथिके, ग्लायमानमालतीमुकुले, बन्धूकबान्धवे, विसूत्रितसौत्रामधनुषि, स्मेरकाश्मीररजःपिञ्जरितदशदिशि, विकस्वरकमले, शरत्समयारम्भे विजृम्भमाणे कन्दर्पकेतुरितस्ततः परिभ्रमन् काञ्चिच्छिलापुत्रिकां मम प्रियानुकारिणीति करेण पस्पर्श।

अथ सा स्पृष्टमात्रैव शिलाभावमुत्सृज्य वासवदत्तास्वरूपं प्रपेदे। तामवलोक्य कन्दर्पकेतुरमृतार्णवमग्न इव सुचिरमालिङ्ग्य, 'प्रिये वासवदत्ते ! किमेतत्' इति पप्रच्छ।

सा तु दीर्घमुष्णं च निश्वस्य प्रत्युवाच--आर्यपुत्र ! अपुण्याया मन्दभाग्याया मम कृते महाभागो भवान् उत्सृष्टराज्य एकाकी परिभ्रमन् प्राकृतजन इव अवाङ्मनसगोचरं दुःखमनुबभूव । उपवासादिना तृषातुरे भवति निद्राश्रान्ते प्रथमप्रबुद्धाऽहं भवतः फलमूलादिकमाहरिष्यामीति विचिन्त्य फलाद्यन्वेषणाय वने नल्वमात्रमगच्छम् ।

अथ क्षणेन तरुगुल्मान्तरितं सेनानिवेशं दृष्ट्वा 'किमयं ममान्वेषणाय तातस्य व्यूहः समायातः। आहोस्विदार्यपुत्रस्येति चिन्तयन्तीं मा चारकथितोदन्तो दूरात्किरातसेनापतिर्धावति स्म। ततोऽन्यः किरातसेनापतिस्तादृश एव तथाभूतया सेनायाऽन्वितो मृगयां गतः, सोऽपि तच्छ्रुत्वा धावति स्म।

अनन्तरं चिन्तितं मया यद्यहमार्यपुत्राय कथयामि तदा स एकाक्येभिरेव हन्तव्योऽथ न कथयामि तदेभिरहं घातनीयेति चिन्ताक्षण एव एकामिषलुब्धयोरिव गृध्रयोः तयोर्युद्धमासीत्। ततः प्रवृत्तशरासारदुर्दिनस्थगितदिनकरकिरणे, रणकर्मविशारदद्विरदकरदूरोत्क्षिप्तखड्गधरसुभटाश्लिष्यमाणविद्याधरविभ्रमे, समरदर्शनसञ्चरदनेकनभश्चरचारणरचितचक्रवाले, चरच्चारुभटखड्गखण्डित-

द्विपपदसमाप्तपिशाचिकाकर्णोलूखलाभरणे, कौतुकाकृष्टजनकृतवदननान्दीके, कान्दिशीकभीरुणि, प्रस्कन्नक्लीबजने, रणोद्यतजितकाशिनि रणखले, शृगालिकाशृगालप्रार्थनीयेष्वामिषपिण्डेष्विव, जिह्मगदष्टेष्विव, श्वित्रदुर्भगेष्विव, शरीरेष्वनास्थां कलयन्तः, समं द्विषतां धनुषाञ्च जीवाकर्षणं योधाश्चक्रुः।

तत्र त्यागिन इव दानवन्तो मार्गणसम्पातं सहन्तः, समृद्धविलासिन इव शृङ्गारोपशोभिताः सहेमकक्ष्याश्च, सदारामा एव कदलीराजिताः सद्विजाश्च, निशानिवहा इव नक्षत्रमालोपशोभिताः, शरद्दिवसा इव समुल्लसत्पद्मा महामृगा बभुः।

उत्कुपिता इव क्षमां मुञ्चन्तः, पयोधय इवावर्तशोभिनः सोर्मयश्च, उद्यानोद्देशा इव समल्लिकाक्षाः, कुलालगृहा इव अभिनवभाण्डहारिणः, रत्नाकरा इव सदेवमणयः, लेखा इव सेन्द्रायुधवृद्धयः, क्षीबा इव पानभूषितास्तुरङ्गमा विरेजुः।

कर्णाभ्यां श्रुतपरपरिवादाभ्याम्, खलोदयसाधुविपत्तिसाक्षिभ्यामक्षिभ्याम्, अस्थानेऽपि नमता मूर्ध्ना कीर्तयता चाकीर्तनीयान्यास्येन च वियुक्तोऽहं दिष्ट्येति हर्षादिव ननर्त चिरं कबन्धः।

ततः कृतपरिहासेने चक्षुः पिदधता, परापवादश्रवणभीरुणेव श्रोत्रवृत्तिं स्थगयता, सोन्मादेनेव वायुवेगविक्षिप्तेन, पलितङ्करणेनेव सुरयोषिताम्, अन्धकरणेनेव योधानाम्,

तिमिरेणेव समरप्रदोषस्य, पतितेनेव विमुक्तगोत्रेण, मीमांसकदर्शनेनेव तिरस्कृतदिगम्बरदर्शनेन, सत्पुरुषेणेव विष्णुपदावलम्बिना, कुनृपतिनेव नक्षत्रपथगामिना, कलिङ्गेनेव कृतधूम्यारुचिना, राजसेनेव व्यवहितसत्त्वेन, अविनीतेनेव समुद्धतेन, असज्जनेनेव पिहितसत्पथेन, रणजेन रजोजातेन विजजृम्भे ।

अनन्तरं च नारायण इव कश्चिन्नरकच्छेदमकार्षीत्। कश्चिद्बौद्धसिद्धान्त इव क्षपितश्रुतिवचनदर्शनोऽभवत्। कश्चित्क्षपणक इव कटावृतविग्रहोऽभवत्। कश्चिदाशङ्कितोरुभङ्गःसुयोधन इव पयसि विवेश। कश्चित्सुरापद्विज इव पपात। कश्चित् शरतल्पगतो भीष्म इव गतायुश्चिरं श्वसन्नासीत्। कश्चित्कर्ण इव विक्लवीकृतसर्वाङ्गः शक्तिमोक्षमकरोत्। कश्चिद्राघव इव रावणवधमकरोत्।

ततो विध्वस्तध्वजपटं पतत्पताकं च्युतचापचामरापीडं स्खलत्खङ्गं तत्समस्तमुभयं मिथो जगाम हननं सैन्यम्।

ततश्च यस्याश्रमः, तेन मुनिना पुष्पपादिकमादायागतेन योगदृशा प्रतिपन्नवृत्तान्तेन 'त्वत्कृते ममायमाश्रमो भग्न' इति कुपितेन 'शिलामयी पत्रिका भव' इति शप्ताऽस्म्यहम्। ततः क्षणेनैवेयं वराकी बहुदुःखमनुभवतीत्यनुग्रहादार्यपुत्रकरुणया च स मुनिर्याच्यमान आर्यपुत्रहस्तस्पर्शावधिकं शापमकरोत्।

ततः कन्दर्पकेतुः श्रुतवृत्तान्तेन समागतेन मकरन्देन तया वासवदत्तया च समं स्वपुरं गत्वा हृदयाभिलषितानि सुरलोकदुर्लभानि सुखानि ताभ्यां सहानुभवन् कालमनेकं निनाय।

**इति महाकविसुबन्धुविरचिता वासवदत्ता समाप्ता ।**

**----:*:----**